फुल्लेन्दीवरकान्तिमिन्दुवदनं बर्हावतंसप्रियं,
श्रीवत्सांकमुदारकौस्तुभधरं पीताम्बरं सुन्दरम् ।
गोपीनां नयनोत्पलार्चिततनुं गोगोपसंघावृतम्,
गोविन्दं कलवेणुवादनपरं दिव्याङ्गभूषं भजे ॥५॥

ज्वालेवोर्ध्वविसर्पिणी परिणतस्यान्तस्तपस्तेजसो,
गङ्गातोयतरङ्गसर्पवसतिर्वल्मीकलक्ष्मीरिव ।
संध्येवार्द्रमृणालकोमलतनो रिन्दोः सदा स्थायिनी,
पायाद्वस्तरुणारुणांशुकपिशा शम्भोर्जटासन्ततिः ॥६॥

कल्याणानां त्वमसि महसां भाजनं विश्वमूर्ते,
धुर्यां लक्ष्मीमिह मयि भृशं धेहि देव प्रसीद ।
यद्यत् पापं प्रतिजहि जगन्नाथ नम्रस्य तन्मे,
भद्रं भद्रं वितर भगवन् भूयसे मंगलाय ॥७॥

रविभावसते सतां क्रियायै, सुधया तर्पयते सुरान्पितॄंश्च ।
तमसां निशि मूर्छतां निहन्त्रे, हरचूडानिहितात्मने नमस्ते ॥८॥

वायुर्यमोऽग्निर्वरुणः शशाङ्कः प्रजापतिस्त्वं प्रपितामहश्च ।
नमो नमस्तेऽस्तु सहस्रकृत्वः, पुनश्च भूयोपि नमो नमस्ते ॥९॥

[illegible]

[illegible] -

अनागतविधाता च, प्रत्युत्पन्नमतिस्तथा ।
द्वावेतौ सुखमेधेते, यद्भविष्यो विनश्यति ॥३॥

[illegible]

कथा ३

[illegible] तथा प्रत्युत्पन्नमतिरपि—यद [illegible] मत्स्यजीविन आगमिष्यन्ति [illegible] तन्मया [illegible] केन व्यात्मानं रक्षेयम् । भविष्यदर्थे प्रमाणाभावात्कथं व्यर्थमेवा विषये चिन्ता कार्या ? यद्भविष्यस्तु विषयमेवेदमाह—

यदभावि न तद्भावि, भावि चेन्न तदन्यथा ।
इति चिन्ताविषघ्नोऽयमगदः किं न पीयते ॥४॥
अवश्यं भाविनो भावा, भवन्ति महतामपि ।
नग्नत्वं नीलकण्ठस्य, महाहिशयनं हरेः ॥५॥

इत्थं तद् वचनमनादृत्य गमनं प्रति निरारम्भ एवासीत्। एवं तौ तत्र स्थितौ मत्स्यावनागतविधाता नद्याः स्रोतः प्रविश्य जलान्तरं गतः। अन्येद्युश्च निर्गते तस्मिन् परिजनसमेतैर्धीवरैरन्तःस्रोतो निरुध्य संवर्तजालं प्रक्षिप्य सकलमत्स्यानां बन्धः कृतः। एवं गते प्रत्युत्पन्नमतिर्मृतरूपं कृत्वाऽऽत्मानं जालस्यान्तर्गतं दर्शितवान्। तैश्च स्वयमेव मृतोऽसौ महामत्स्य इति मत्वा जालादाकृष्य स्रोतःसमीपे स्थापितः। ततस्तु अवसरमासाद्य उत्प्लुत्यान्यं जलाशयं सहसैव प्रविष्टः। यद् भविष्यस्तु किंकर्तव्यतामूढ इतस्ततो भ्रमञ्जालैर्बद्धो लगुडप्रहारैर्व्यापादितः। तस्माद् यथाऽहं ह्रदान्तरं प्राप्नोमि तथा विधीयताम्। हंसावाहतुः—जलाशयान्तरे प्राप्ते तव कुशलम्। स्थले गच्छतस्ते को विधिः? कूर्म आह—यथा अहं भवद्भ्यां सहाऽऽकाशवर्त्मना यामि तथा क्रियताम्। हंसौ ब्रूतः—कथमुपायः संभवति? कच्छपोऽवदत्—युवाभ्यां चञ्चुधृतं काष्ठदण्डमेकं मया मुखेनावलम्ब्य गन्तव्यम्। युवयोः पक्षबलेन मयाऽपि सुखं नभोमार्गेण गन्तव्यम्। हंसाववदताम्—संभवत्येष उपायः। किन्तु—

उपायं चिन्तयन् प्राज्ञो, ह्यपायमपि चिन्तयेत्।
पश्यतो बकमूर्खस्य, नकुलैर्भक्षिताः प्रजाः॥६॥

कूर्मेण पृष्टौ हंसाववदताम्—

कथा ६

अस्ति कस्मिंश्चित्पर्वते महानर्जुनतरुः। तत्रानेके बकाः प्रतिवसन्। तद्वृक्षविवरानुसारी महाकायः सर्पो यावन्ति बकापत्यानि भवन्ति तावन्त्येषामजातपक्षाणि भक्षयति स्म। तेन च निर्वेदेन तेष्वेकतमो नष्टसंज्ञ आहारक्रियामुत्सृज्य सरस्तीरं गत्वा बको विमनस्को रुदन्नास्ते। अथैकः कुलीरकस्तं निर्विण्णं दृष्ट्वा आह—माम! किमर्थोद्विग्नो भवानिति? स तु तस्मै यथावृत्त-

मपन्यमसगुणमान्यानयान । कुलीरकर्म मर्मर्षितवान—भद्र ! अहमुपायं तद्वधाय ते कथयामि । येन नकुलवमनिरोधन् यदि सर्पविवरं यावद् विन्दित्रपरंपरया मत्स्यशिरांसि विकीर्यन्ताम् । ततस्तद्दारानुलुब्धैर्नकुलैरयं भुजगोऽभ्यागम्य दृष्ट्वा स्वभावविद्वेषाद् व्यापादयितव्यः । तथानुष्ठिते नकुलैर्मत्स्यमार्गानुसारिभिः पूर्ववैरक्रियामनुसरद्भिः सर्पं व्यापाद्य पूर्वदृष्टमार्गमाधावद्भिस्तद्वृत्ते बकशावकाश्च भुक्ताः । पश्चात्तैः ककुभवृक्षनामाऽस्य बकापत्यान्यपि भक्षितानि । अत आवां ब्रूव उपायं चिन्तयन् प्रतिक्रियां योजयेदिति । अवश्यं नयाव आवां भवन्तम् । आवाभ्यां नीयमानं त्वामालोक्य लोकैः किञ्चिद्वक्तव्यमेव । त्वया पुनश्चापलान्न किञ्चिद् वक्तव्यम् । यदि त्वमुत्तरं दास्यसि तर्हि तव मरणम् । तन्सर्वथाऽत्रैव तिष्ठ । कूर्मो वदति—किमहमप्राज्ञः ? नाहमुत्तरं दास्यामि । न किमपि वक्ष्यामीति । अथ हंसौ यष्टिमानीयाहतुः—इमां तु यष्टिं दशनैरापीडय । आवामपि अन्तयोर्गृहीत्वा यथानिर्दिष्टं ह्रदान्तरं नयावः । एवं च निष्पन्ने तज्जलाशयसंनिकृष्टग्रामस्योपरिष्टान्नीयमानशकटचक्रप्रमाणं कच्छपं दृष्ट्वा सर्वे गोरक्षकाः पश्चाद् धावन्त प्राजल्पन् । कश्चिद् वदति—यदाऽयं कूर्मः पतति तदत्रैव पक्त्वा खादितव्यः । अपरो गदति—केवलं दग्ध्वा स्वदनीयः । अन्योऽब्रवीति—गृहं नीत्वा सम्यक् संस्कृत्य भक्षणीयः । तत्कलकलं श्रुत्वाऽऽसन्नविनाशः स कमठो विस्मृतपूर्वसंस्कारो यष्टिं त्यक्त्वा कोपाविष्टः प्राह—युष्माभिर्भस्म भक्षणीयः । इति ब्रुवन् वचनसमकालमेव काष्ठात्परिभ्रष्टो भूमौ निपातितः । मांसार्थिभिर्गोपालैश्च पातसमकालमेव तीक्ष्णशस्त्रैः खण्डशो विभज्य भक्षितः । अथ टिट्टिभीकथितां कथां श्रुत्वा टिट्टिभ आह—भद्रे ! किं मां यद्भविष्यवत् मूर्खकच्छपवद्वा मन्यसे ? तत्र भीः कार्या । मद्भुजपाररक्षितायाः कस्ते पराभवं कर्तुं शक्तः ?

अथ गतेषु केषुचिद्दिनेषु टिट्टिभी तत्रैव प्रसूता । श्रुतपूर्वतदाला-

येन समुद्रेणापि तद्भक्षणाभिलाषया टिट्टिभाण्डानि दूरमपहृतानि। टिट्टिभी शून्यमण्डस्थानं दृष्ट्वा भर्तारमाह—नाथ! [illegible] मम मन्दभाग्याया यत्पूर्वं मया [illegible] [illegible] इति। टिट्टिभ आह—भद्रे! [illegible] पश्य मे बुद्धिसामर्थ्यम्। [illegible] पक्षिसमाजं [illegible] [illegible] [illegible]। [illegible] पक्षिसमाजेन [illegible]—[illegible] सर्व [illegible]। किं पुनरत्र [illegible]। [illegible] [illegible] [illegible]। [illegible] इति [illegible] पक्षिणो [illegible] [illegible] [illegible] [illegible]। [illegible] [illegible] [illegible] [illegible], यथा—देव! [illegible] [illegible] [illegible] [illegible]। [illegible] [illegible]। देवो [illegible] [illegible]। [illegible] देवं दृष्ट्वा [illegible] [illegible]—भगवन्! [illegible] [illegible] [illegible]। [illegible] देव [illegible] [illegible] [illegible] टिट्टिभाय। [illegible] [illegible] [illegible] [illegible] [illegible] [illegible]। [illegible] [illegible] [illegible]। अतोऽहं ब्रवीमि बुद्धिर्यस्य बलं तस्य॥

— पञ्चतन्त्रम्

१—आचारधर्माः

दिङ्मूढैः [illegible] [illegible] [illegible]।
[illegible], यो धर्मं [illegible]॥१॥
[illegible] [illegible], [illegible] च [illegible]।
आचारस्यैव [illegible] च॥२॥

वेदः स्मृतिः सदाचारः, स्वस्य च प्रियमात्मनः ।
एतच्चतुर्विधं प्राहुः, साक्षाद् धर्मस्य लक्षणम् ॥३॥
अर्थकामेष्वसक्तानां, धर्मज्ञानं विधीयते ।
धर्मं जिज्ञासमानानां, प्रमाणं परमं श्रुतिः ॥४॥
यस्मिन्देशे य आचारः, पारंपर्यक्रमागतः ।
वर्णानां सान्तरालानां, स सदाचार उच्यते ॥५॥
आचारः परमो धर्मः, सर्वेषामिति निश्चयः ।
हीनाचारः परीतात्मा, प्रेत्य चेह विनश्यति ॥६॥
आचाराल्लभ्यते पूजा, आचारादीप्सिताः प्रजाः ।
आचाराद्धनमक्षय्य,-माचारात् प्राप्यते सुखम् ॥७॥
दुराचारो हि पुरुषो, लोके भवति निन्दितः ।
दुःखभोगी च सततं, रोगी चाल्पायुषो भवेत् ॥८॥
इन्द्रियाणां प्रसंगेन, दोषमृच्छत्यसंशयम् ।
सन्नियम्य तु तान्येव, नरः सिद्धिं समश्नुते ॥९॥
न जातु कामः कामाना,-मुपभोगेन शाम्यति ।
हविषा कृष्णवर्त्मेव, भूय एवाभिवर्धते ॥१०॥
नापृष्टः कस्यचिद् ब्रूया,-न्न चान्यायेन पृच्छतः ।
परनिन्दापवादाँश्च, न ब्रूयात् परुषं वचः ॥११॥
सत्यं ब्रूयात्प्रियं ब्रूया,-न्न ब्रूयात् सत्यमप्रियम् ।
प्रियं च नानृतं ब्रूया,-देष धर्मः सनातनः ॥१२॥

न विग्रहकथां कुर्यात्, भद्रमेव सदा वदेत् ।
शुष्कवैरं विवादं च, न कुर्यात् केनचित्सह ॥१३॥
अहिंसयैव भूतानां, कार्यं श्रेयोऽनुशासनम् ।
वाणी च मधुरा श्लक्ष्णा, प्रयोज्या धर्ममिच्छता ॥१४॥
द्यूतं च जनवादं च, परीवादं तथानृतम् ।
स्त्रीभिः क्रीडां चोपघातं, परेषां च विवर्जयेत् ॥१५॥
भार्यां परस्य दृष्ट्वा वा, न विचित्तमना भवेत् ।
चलानीन्द्रियग्रामं, [illegible] वर्जयेत् ॥१६॥
विषादप्यमृतं ग्राह्यं, बालादपि सुभाषितम् ।
अमित्रादपि सद्वृत्त-ममेध्यादपि काञ्चनम् ॥१७॥
तृणानि भूमिरुदकं, वाक्चतुर्थी च सूनृता ।
एतान्यपि सतां गेहे, नोच्छिद्यन्ते कदाचन ॥१८॥
आचार्यश्च पिता चैव, माता भ्राता च पूर्वजः ।
नार्तेनाप्यवमन्तव्या, विदुषा च विशेषतः ॥१९॥
यदि स्त्री यद्यवरजः, श्रेयः किंचित्समाचरेत् ।
तत्सर्वमाचरेद्युक्तो, यत्र चास्य रमेन्मनः ॥२०॥
[illegible] स्त्रीहार्दं, [illegible] ।
वर्णी तथ विद्यार्थी, [illegible] ॥२१॥
न [illegible], [illegible] ।
न शीर्षं करसंस्थाप्य, स्वपेत् दिवसे क्वचित् ॥२२॥

न लघयेद्वत्सतंत्रीं, न प्रधावेच्च वर्षति ।
न चोदके निरीक्षेत, नानाहूतः सदो विशेत् ॥२३॥
नाग्निं मुखेनोपधमे,-न्नग्नां नेक्षेत च स्त्रियम् ।
नैकः सुप्याच्छून्यगेहे, न शयानं प्रबोधयेत् ॥२४॥
न च्छिन्द्यान्नखलोमानि, दन्तैर्नोत्पाटयेन्नखान् ।
न मृल्लोष्ठं च मृद्नीया,-न्नच्छिन्द्यात् करजैस्तृणम् ॥२५॥
अद्वारेण च नातीयाद्, ग्रामं वा वेश्म वाऽऽवृतम् ।
रात्रौ च वृक्षमूलानि, मद्यागाराणि वर्जयेत् ॥२६॥
न संहताभ्यां पाणिभ्यां, कण्डूयेदात्मनः शिरः ।
नोर्ध्वजानुश्चिरं तिष्ठेन्, न शयीताऽनृजुः क्वचित् ॥२७॥
न पाणिपादचपलो, न नेत्रचपलोऽनृजुः ।
न स्याद् वाक्चपलश्चैव, न परद्रोहकर्मधीः ॥२८॥
ब्राह्मे मुहूर्ते बुध्येत, धर्मार्थौ चानुचिन्तयेत् ।
उत्थायावश्यकं कृत्वा, कृतशौचः समर्चयेत् ॥२९॥
मैत्रं प्रसाधनं स्नानं, दन्तधावनमञ्जनम् ।
पूर्वाह्ण एव कुर्वीत, देवतानां च पूजनम् ॥३०॥
प्रणमेद् गुरुवृद्धांश्च, दद्याच्चैवासनं स्वकम् ।
कृताञ्जलिरुपासीत, गच्छतः पृष्ठतोऽन्वियात् ॥३१॥
दृढकारी मृदुर्दान्तः, क्रूराचारैरसंवसन् ।
अहिंस्रो दानमानाभ्यां, जयेत्स्वर्गं सुवृत्तयान् ॥३२॥

परित्यज्यैदर्थवार्त्ता, यो ध्याता धर्मवर्जितः ।
धर्मे चाप्यगुणोदयै, कीर्तिविमुखोऽपि च ॥२३॥
न नीदक्षपि धर्मेण, मनोऽपमर्थं निर्धनदेवं ।
अधार्मिकाणां पापानां,-मायु पश्यन् विपर्ययम् ॥२४॥
येनाप्य पितरौ माता, येन भ्राताः पितामहाः ।
तेन पापात् गतो मार्गे, तेन सम्पूर्ण स्थितं ॥२५॥
सर्वलक्षणहीनोऽपि, यः सदाचारवान् नरः ।
श्रद्धानोऽनसूयश्च, शतं वर्षाणि जीवति ॥२६॥

न ददाति न चाश्नाति, धनं रक्षति जीववत् ।
प्रातरस्मरणीयात्मा, कृपणः कस्य नार्थदः ॥१॥

[illegible] वृथा [illegible] । [illegible] दुर्भिक्षे [illegible] [illegible] ॥ अत —

एकाकी पुरुषः श्रीमान्, धनं तस्य नरं दृष्ट्वा ।
[illegible] च सुहृदः सर्वे, धनहीनं कुटुम्बकम् ॥२॥

[illegible] । [illegible] दुर्भिक्षे [illegible]

कुटुम्बपरिवारानन्नेन विना म्रियमाणान् पश्यन्नपि कस्मैचि किमपि न ददौ। किंच परिवारैः कण्ठगतप्राणैर्याच्यमानः पर मिदं पपाठ—

कृपणस्य धनं प्राणाः, प्रार्थयद्भिश्च तन्मम।
प्राणाः किं नैव गृह्णन्ते, यतो न स्युर्धने शुचः ॥३॥

ततस्तस्य मित्रपुत्रकलत्रादयः सर्वे विनाऽन्नेन मृताः। स्वयं प्राणमात्रावशेषः परामृष्टवान्।

यन्न पुत्रकलत्रेभ्यो, दत्तं वित्तं मयाऽर्जितम्।
तन्निजप्राणरक्षार्थं, कथं मोक्ष्ये निराकुलः ॥४॥

ततः स्वप्राणरक्षायामपि न वित्तं विनियुंक्ते। उपवासेन दिनानि गमयन्तं समतिदुर्बलं दृष्ट्वा तन्नगरवासिनः कारुणिकाः कतिचि त्पुरुषाः प्रोचुः—रे कृपण! किं करिष्यसि तेन धनेन? विद्यमानेऽपि धने *निजप्राणाश्नरयतोऽनुमन्यसे।* अथवोचितमेवैतत्—

अर्जने लभते खेदं, गते शोकं च विन्दति।
नाप्नोति कृपणो वित्ते, दानभोगमयं सुखम् ॥५॥

अपि च—

दीपते यदनुत्साहाद्, भुज्यते यन्न कामतः।
धनं तत्वविदुःखार्थं, खेदार्थं वाऽपि चिन्त्यतः ॥६॥

एतच्छ्रुत्वा गूढधन उवाच—अये नागरिकाः! किमपि कुरुत मयान् प्राणव्ययेनापि धनव्ययो न स्वीक्रियते। तर्हि राज्ञा वा चौरेण वा प्रतीतव्यं त्वयि निपन्ने तव द्रविणम्। गूढधनः सकोप आह— अल्पधियैव बुद्धिविहीनस्य धनमन्ये गृह्णन्ति। मया स्वकीयं धनं गर्ते बद्ध्वा मनेऽर्पितमिति। गतेषु नागरवासिषु स कदर्यो धनपोल

[illegible]

[illegible]

[illegible]

चरित्रेण च को युक्तः, सर्वभूतेषु को हितः ।
विद्वान्कः कः समर्थश्च, कश्चैकप्रियदर्शनः ॥३॥
आत्मवान् को जितक्रोधो, द्युतिमान्कोऽनसूयकः ।
कस्माद्बिभ्यति देवाश्च, जातरोषस्य संयुगे ॥४॥
एतदिच्छाम्यहं श्रोतुं, परं कौतूहलं हि मे ।
महर्षे ! त्वं समर्थोऽसि, ज्ञातुमेवंविधं नरम् ॥५॥
श्रुत्वा चैतत् त्रिलोकज्ञो, वाल्मीकेर्नारदो वचः ।
श्रूयतामिति चामंत्र्य, प्रहृष्टो वाक्यमब्रवीत् ॥६॥
बहवो दुर्लभाश्चैव, ये त्वया कीर्तिता गुणाः ।
मुने ! वक्ष्याम्यहं बुद्ध्वा, तैर्युक्तः श्रूयतां नरः ॥७॥
इक्ष्वाकुवंशप्रभवो, रामो नाम जनैः श्रुतः ।
नियतात्मा महावीर्यो, द्युतिमान् धृतिमान्वशी ॥८॥
बुद्धिमान्नीतिमान् वाग्मी, श्रीमाञ्छत्रुनिबर्हणः ।
विपुलांसो महाबाहुः, कम्बुग्रीवो महाहनुः ॥९॥
महोरस्को महेष्वासो, गूढजत्रुररिन्दमः ।
आजानुबाहुः सुशिराः, सुललाटः सुविक्रमः ॥१०
समः समविभक्ताङ्गः, स्निग्धवर्णः प्रतापवान् ।
पीनवक्षा विशालाक्षो, लक्ष्मीवाञ्छुभलक्षणः ॥११
धर्मज्ञः सत्यसंधश्च, प्रजानां च हिते रतः ।
यशस्वी ज्ञानसंपन्नः, शुचिर्वश्यः समाधिमान् ॥१२

प्रजापतिसमः श्रीमान्, धाता रिपुनिषूदनः ।
रक्षिता जीवलोकस्य, धर्मस्य परिरक्षिता ॥१३॥
वृत्तस्य रक्षिता स्वस्य, चातुर्वर्ण्यस्य रक्षिता ।
वेदवेदाङ्गतत्त्वज्ञो, धनुर्वेदे च निष्ठितः ॥१४॥
सर्वशास्त्रार्थतत्त्वज्ञः, स्मृतिमान्प्रतिभानवान् ।
सर्वलोकप्रियः साधु,-रदीनात्मा विचक्षणः ॥१५॥
सर्वदाभिगतः सद्भिः, समुद्र इव सिन्धुभिः ।
आर्यः सर्वसमश्चैव, सदैव प्रियदर्शनः ॥१६॥
समुद्र इव गाम्भीर्ये, धैर्येण हिमवानिव ।
विष्णुना सदृशो वीर्ये, सोमवत् प्रियदर्शनः ॥१७॥
कालाग्निसदृशः क्रोधे, क्षमया पृथिवीसमः ।
धनदेन समस्त्यागे, सत्ये धर्म इवापरः ॥१८॥
आदित्य इव तेजस्वी, लोककान्तः शशी यथा ।
रूपवान्सुभगः श्रीमान्, कन्दर्प इव मूर्तिमान् ॥१९॥
बृहस्पतिसमो बुद्ध्या, वक्ता वाग्विदांवरः ।
दुन्दुभिस्वननिर्घोषः, स्निग्धवर्णः प्रतापवान् ॥२०॥
साधूनामुपकारज्ञः, प्रचारज्ञश्च कर्मणाम् ।
एवं सर्वगुणोपेतः, कौशल्यानन्दवर्धनः ॥२१॥

—रामायणम् ।

चरित्रेण च को युक्तः, सर्वभूतेषु को हितः ।
विद्वान्कः कः समर्थश्च, कश्चैकप्रियदर्शनः ॥३॥
आत्मवान् को जितक्रोधो, द्युतिमान्कोऽनसूयकः ।
कस्माद्बिभ्यति देवाश्च, जातरोषस्य संयुगे ॥४
एतदिच्छाम्यहं श्रोतुं, परं कौतूहलं हि मे ।
महर्षे ! त्वं समर्थोऽसि, ज्ञातुमेवंविधं नरम् ॥५
श्रुत्वा चैतत् त्रिलोकज्ञो, वाल्मीकेर्नारदो वचः ।
श्रूयतामिति चामंत्र्य, प्रहृष्टो वाक्यमब्रवीत् ॥६
बहवो दुर्लभाश्चैव, ये त्वया कीर्तिता गुणाः ।
मुने ! वक्ष्याम्यहं बुद्ध्या, तैर्युक्तः श्रूयतां नरः ॥७॥
इक्ष्वाकुवंशप्रभवो, रामो नाम जनैः श्रुतः ।
नियतात्मा महावीर्यो, द्युतिमान् धृतिमान्वशी ॥८॥
बुद्धिमान्नीतिमान् वाग्मी, श्रीमाञ्छत्रुनिबर्हणः ।
विपुलांसो महाबाहुः, कम्बुग्रीवो महाहनुः ॥९॥
महोरस्को महेष्वासो, गूढजत्रुररिन्दमः ।
आजानुबाहुः सुशिराः, सुललाटः सुविक्रमः ॥१०॥
समः समविभक्ताङ्गः, स्निग्धवर्णः प्रतापवान् ।
पीनवक्षा विशालाक्षो, लक्ष्मीवाञ्छुभलक्षणः ॥११॥
धर्मज्ञः सत्यसंधश्च, प्रजानां च हिते रतः ।
यशस्वी ज्ञानसंपन्नः, शुचिर्वश्यः समाधिमान् ॥१२॥

गीर्णे तया राजपथं कुमारः, पौरैर्विनीतैः शुचिधीरवेषैः
त्पूर्वमालोक्य जहर्ष किंचि,-न्मेने पुनर्भावमिवात्मनश्च
तस्तथा गच्छति राजपुत्रे, तैरेव देवैर्विहितो गता
ं चैव मार्गे मृतमुह्यमानं, सूतः कुमारश्च ददर्श नान्यः
थाब्रवीद्राजसुतः स सूतं, "नरैश्चतुर्भिर्ह्रियते क
ीनैर्मनुष्यैरनुगम्यमानो, या भूषितश्चाप्यवरुद्यते च"
तः स शुद्धात्मभिरेव देवैः, शुद्धाधिवासैरभिभूतचे
वाच्यमप्यर्थमिमं नियन्ता, प्रव्याजहारार्थविदीश्वराय ॥१०
द्धीन्द्रियप्राणगुणैर्वियुक्तः, सुप्तो विसंज्ञस्तृणकाष्ठभूतः
विध्य संरक्ष्य च यत्नवद्भिः, प्रियाप्रियैस्त्यज्यत एष कोऽपि॥११
ति प्रणेतुः स निशम्य वाक्यं, संचुक्षुभे किंचिदुवाच चैनम्
कं केवलस्यैव जनस्य धर्मः, सर्वः प्रजानामयमीदृशोऽन्तः॥१२
तः प्रणेता वदति स्म तस्मै, सर्वप्रजानामयमन्तकर्मा
ीनस्य मध्यस्य महात्मनो वा, सर्वस्य लोके ध्रुव एव नाशः॥१३
तः स धीरोऽपि नरेन्द्रसूनुः, श्रुत्वैव मृत्युं विषसाद सद्यः
ंसेन संश्लिष्य च कूबराग्रं, प्रोवाच निह्रादवता स्वरेण॥१४
यं च निष्ठा नियतं प्रजानां, प्रमाद्यति त्यक्तभयश्च लोकः
नांसि शङ्के कठिनानि नृणां, स्वस्थास्तथा ह्यध्वनि वर्तमानः॥१५
स्माद्रथं सूत ! निवर्त्यतां नो:, विहारभूमिं न हि गन्तुकामः
ानन्विनाशं कथमार्तिकाले, सचेतनः स्यादिह हि प्रमत्तः॥१६॥

—बुद्धचरितात

८—हनुमद्ग्रहणम्

(ततः प्रविशति शंकुकर्णः)

शंकुकर्णः—क इह भोः काञ्चनतोरणद्वारमशून्यं कुरुते ? (प्रविश्य)।

प्रतिहारी—आर्य ! अहं विजया । किं निमित्तम् ?

शंकु०—निवेद्यतां निवेद्यतां महाराजाय । अशोकवनिकेति ।

प्रतिहा०—आर्य ! नित्यं भर्तृपादमूले वर्तमानस्य अनास्वादित-पूर्वोऽयं सम्भ्रमः । किं नेदम् ?

शंकु०—भवति ! अतिपाति कार्यमिदम् । शीघ्रं निवेद्यताम् ।

प्रतिहा०—आर्य ! इयं निवेदयामि । (निष्क्रान्ता)

शंकु०—(पुरतो विलोक्य) अये ! अयं महाराजो लङ्केश्वर इत एवाभिवर्तते । (ततः प्रविशति रावणः)

रावणः—कथं कथं [illegible] परिभूतोऽहम् ? ।

शंकु०—(उपसृत्य) जयतु महाराजः । [illegible] केनापि वानरेण [illegible] ।

रावणः—(सावज्ञं) कथं वानरेणेति । गच्छ शीघ्रं निगृह्य आनय ।

शंकु०—यदाज्ञापयति महाराजः । (निष्क्रम्य प्रविश्य)

शंकु०—जयतु महाराजः । महाराज ! [illegible] । तेन खलु [illegible] । [illegible] । [illegible] । [illegible] महाराज ।

रावणः—तेन हि किंकराणां सहस्रं बलमाज्ञापय वानरग्रहणाय ।

शंकु०—यदाज्ञापयति महाराज । (निष्क्रम्य प्रविश्य)

शंकु०—जयतु महाराज ।

अस्मदीयैर्महायुद्धै,-रस्मदीया महाबलाः ।
क्षिप्रमेव हतास्तेन, किंकरा द्रुमयोधिना ॥१॥

रावणः—कथं हता इति । तेन हि कुमारमत्तमाज्ञापय प्लवंगमग्रहणाय ।

शंकु०—यदाज्ञापयति महाराज । (निष्क्रम्य पुनः प्रविश्य) जयतु महाराजः । अनन्तरीयं बलमाज्ञापयितुमर्हति महाराजः ।

रावणः—किमर्थम् ?

शंकु०—श्रोतुमर्हति महाराजः । कुमारं कपिमभिगच्छन्तं दृष्ट्वा महाराजेनानाज्ञापिता अप्यनुगताः पंच सेनापतयः । तानभिद्रुतान् दृष्ट्वा किंचिद् भीत एव तोरणमाश्रित्य काचनपरिघमुद्यम्य निपातितास्तेन हरिणा पंच चमूपतयः । ततः कुमारमत्तं क्रोधात्संरक्तनेत्रं बाणजालान् वमन्तं स कपिः सहसा रथं लंघयित्वा कंठे संगृह्य मुष्टिना जघान ।

रावणः—(सरोषं) आः कथं कथं जघानेति । तिष्ठ त्वम् । अहमेव कपिकीटकमेनं क्रोधानलकणैः क्षणाद् भस्मीकरोमि ।

शंकु०—प्रसीदतु प्रसीदतु महाराजः । कुमारमत्तं निहतं श्रुत्वा क्रोधाविष्टहृदयः कुमारेन्द्रजिदभिगतवाँस्तं वनौकसम् ।

संवृत्तं तुमुलं युद्धं, कुमारस्य च तस्य च ।
ततः स वानरः शीघ्रं, बद्धः पाशेन संप्रति ॥२॥

रावण —तेन हि किङ्कराणां सहस्रं बलमाज्ञापय वानरग्रहणाय ।

शंकु०—यदाज्ञापयति महाराज (निष्क्रम्य प्रविश्य)

शंकु०—जयतु महाराज

> अस्मदीयैर्महावृक्षै-रस्मदीया महाबलाः ।
> क्षिप्रमेव हतास्तेन, किंकरा द्रुमयोधिना ॥१॥

रावण —कथं हता इति । तेन हि कुमारमक्षमाज्ञापय प्लवंगमग्रहणाय ।

शंकु०—यदाज्ञापयति महाराज । (निष्क्रम्य पुनः प्रविश्य) जयतु महाराज । अनन्तरीयं बलमाज्ञापयितुमर्हति महाराजः ।

रावण —किमर्थम् ?

शंकु०—श्रोतुमर्हति महाराज । कुमारं कपिमभिगच्छन्तं दृष्ट्वा महाराजेनानाज्ञापिता अप्यनुगता पंच सेनापतयः । तान्मिद्रुतान् दृष्ट्वा किंचिद् भीत इव तोरणमाश्रित्य कांचनपरिघमुद्यम्य निपातितास्तेन हरिणा पञ्च चमूपतयः । ततः कुमारमक्षं क्रोधात्संरक्तनेत्रं बाणजालानि वमन्तं स कपि सहसा रथं लंघयित्वा कंठे संगृह्य मुष्टिना जघान ।

रावण —(सरोष) आः कथं कथं जघानेति । तिष्ठ त्वम् । अहमेव कपिकीटकमेनं क्रोधानलकणैः क्षणाद् भस्मीकरोमि ।

शंकु०—प्रसीदतु प्रसीदतु महाराजः । कुमारमक्षं निहतं श्रुत्वा क्रोधाविष्टहृदयः कुमारेन्द्रजिदभिगतवाँस्तं वनौकसम् ।

> संवृत्तं तुमुलं युद्धं, कुमारस्य च तस्य च ।
> ततः स वानरः शीघ्रं, बद्धः पाशेन संप्रति ॥२॥

रावणः—कोऽत्र विस्मयः। इन्द्रजिता शाखामृगो बद्ध इति। गच्छ विभीषणस्तावदाहूयताम्।

(ततः प्रविशति राक्षसैर्गृहीतो हनूमान्
विभीषणश्च शंकुकर्णानुयातः)

हनूमान्—

नैवाहं धर्षितस्तेन, नैश्चतेन दुरात्मना।
स्वयं ग्रहणमापन्नो, रावणेश दिदृक्षया ॥३॥

(उपगम्य) भोः राजन्! अपि कुशली भवान्।

रावणः—(सावज्ञम्) विभीषण! किमस्य तत्कर्म।

विभीषणः—प्रष्टुमर्हति महाराजः कस्त्वमिति।

रावणः—रे वानर! कस्त्वम्? केन कारणेन धर्षितमस्माक-मन्तःपुरम्?

हनूमान्—भोः श्रूयताम्।

अंजनायां समुत्पन्नो, मारुतस्यौरसः सुतः।
प्रेषितो राघवेणाहं, हनूमान्नाम वानरः ॥४॥

रावणः—आः। हन्यतामयं वानरः।

विभीषणः—प्रसीदतु महाराजः। सर्वापराधेष्ववध्याः खलु दूताः।

रावणः—दूतवध खलु वधनीयः। शंकुकर्ण! लांगूलमादीप्य विसृज्यतामयं मर्कटः।

शंकुकर्णः—यदाज्ञापयति महाराजः।

(रक्षोभिः सह निष्क्रान्तो हनूमान्)

—अभिषेकनाटकाद् भासकवेः।

९—त्रिशङ्कुवृत्तान्तः

Part I

एतस्मिन्नेव काले तु, सत्यवादी जितेन्द्रियः ।
त्रिशङ्कुरिति विख्यात, इक्ष्वाकुकुलवर्धनः ॥ १ ॥
तस्य बुद्धिः समुत्पन्ना, यजेयमिति राघव ! ।
गच्छेयं स्वशरीरेण, देवानां परमां गतिम् ॥ २ ॥
वसिष्ठं स समाहूय, कथयामास चिन्तितम् ।
अशक्यमिति चाप्युक्तो, वसिष्ठेन महात्मना ॥ ३ ॥
ततस्तत्कर्म सिद्ध्यर्थं, पुत्रांस्तस्य गतो नृपः ।
वासिष्ठा दीर्घतपसः, तपो यत्र हि तेपिरे ॥ ४ ॥
सोऽभिगम्य गुरोः पुत्रान्, तप्यमानान्मनस्विनः ।
अभिवाद्यानुपूर्वेण, ह्रिया किञ्चिदवाङ्मुखः ॥ ५ ॥
अब्रवीत्स तु वासिष्ठान् सर्वानेव कृताञ्जलिः ।
शरणं वः प्रपन्नोऽहं, शरण्यान् शरणं गतः ॥ ६ ॥
प्रत्याख्यातोऽस्मि भद्रं वो वसिष्ठेन महात्मना ।
यष्टुकामो महायज्ञं तदनुज्ञातुमर्हथ ॥ ७ ॥
ते मां भवन्तः सिद्ध्यर्थं, याजयन्तु समाहिताः ।
सशरीरो यथाहं वै, देवलोकमवाप्नुयाम् ॥ ८ ॥
ऋषिपुत्रास्तु ते राम ! राजानमिदमब्रुवन् ।
प्रत्याख्यातोऽसि दुर्मेधः, गुरुणा सत्यवादिना ॥ ९ ॥

तं कथं समतिक्रम्य, शाखान्तरमुपेयिवान् ।
इक्ष्वाकूणां हि सर्वेषां, पुरोधाः परमा गतिः ॥१०॥
न चातिक्रमितुं शक्यं, वचनं सत्यवादिनः ।
अशक्यमिति प्रोवाच, वसिष्ठो भगवानृषिः ॥११॥
तं वयं वै समाहर्तुं, क्रतुं शक्ताः कथंचन ।
बालिशस्त्वं नरश्रेष्ठ !, गम्यतां स्वपुरं पुनः ॥१२॥
तेषां तद्वचनं श्रुत्वा, क्रोधपर्याकुलाक्षरम् ।
स राजा पुनरेवैता, निदं वचनमब्रवीत् ॥१३॥
प्रत्याख्यातो भगवता, गुरुपुत्रैस्तथाधुना ।
अन्यां गतिं गमिष्यामि, स्वस्ति वोऽस्तु तपोधनाः ॥१४॥
गुरुपुत्रास्तु तच्छ्रुत्वा, वाक्यं घोराभिसंहितम् ।
शेपुः परमसंक्रुद्धाः, चण्डालत्वं गमिष्यसि ॥१५॥
अथ रात्र्यां व्यतीतायां, राजा चण्डालतां गतः ।
नीलवस्त्रधरो नीलः, परुषो ध्वस्तमूर्धजः ॥१६॥
चित्यमाल्याङ्गरागश्च, आयसाभरणोऽभवत् ।
तं दृष्ट्वा मंत्रिणः सर्वे, त्यक्त्वा चण्डालरूपिणम् ॥१७॥
प्राद्रवन् सहिता राम, पौराश्चास्यानुगामिनः ।
एकोऽसि राजा काकुत्स्थ, विश्वामित्रं जगाम है ॥१८॥
विश्वामित्रस्तु तं दृष्ट्वा, नृपं चण्डालरूपिणम् ।
इदं जगाद भद्रं ते, राजानं घोरदर्शनम् ॥१९॥

किमागमनकार्यं ते, गजतुल्य ! महाबल ! ।
सर्वोत्साहितो ! धीर !, शासनमण्डलतां गतः ॥२०॥
अथ तद्वाक्यमाकर्ण्य, राजा प्राञ्जलिरब्रवीत् ।
प्रत्याख्यातोऽस्मि गुरुणा, गुरुपुत्रैश्च शापितः ॥२१॥
गतोऽस्मि दिवं गन्तु,-मिति मे सौम्यदर्शन ! ।
सशरीरो तं कामं, मया प्राप्तो विपर्ययः ॥२२॥
पौरैर्दुरीरितं, प्रजाधर्मेण पालिताः ।
गुरवश्च महात्मानः, शीलवृत्तेन तोषिताः ॥२३॥
धर्मं प्रयाचमानस्य, परं प्राप्तुमिच्छतः ।
परितोषं न गच्छन्ति, गुरवो मुनिपुङ्गव ! ॥२४॥
दैवमेव परं मन्ये, पौरुषं तु निरर्थकम् ।
दैवेनाक्रान्तं सर्वं, दैवं हि परमा गतिः ॥२५॥
तस्य मे परमार्तस्य, प्रसादमभिकाङ्क्षतः ।
दैवं पुण्यकर्माणं, निवर्तितुमर्हसि ॥२६॥

१०—त्रिशङ्कूपाख्यानः

Part II

[illegible] तु [illegible], [illegible] मुनिसत्तमः ।
[illegible] वाक्यं, [illegible] वचनम् ॥ १ ॥
[illegible] आजगाम [illegible] मुनिसत्तम ।
[illegible] [illegible], मा [illegible] ॥ २ ॥

अहमामन्त्रये सर्वान्, महर्षीन्मुनिपुंगवान् ।
यज्ञसाह्यकरान् राजन् !, ततो यक्ष्यसि निर्वृतः ॥३॥
गुरुशापकृतं रूपं, यदिदं त्वयि वर्तते ।
अनेन सह रूपेण, सशरीरो गमिष्यसि ॥४॥
हस्तप्राप्तमहं मन्ये, स्वर्गं तव नराधिप ! ।
यस्त्वं कौशिकमागम्य, शरण्यं शरणागतः ॥५॥
एवमुक्त्वा महातेजाः, पुत्रान्परमधार्मिकान् ।
व्यादिदेश महाप्राज्ञान्, यज्ञसंभारकारणात् ॥६॥
सर्वान् शिष्यान् समाहूय, वाक्यमेतदुवाच ह ।
सर्वानृषीन्सवासिष्ठा,-नानयध्वं ममाज्ञया ॥७॥
तस्य तद्वचनं श्रुत्वा, दिशो जग्मुस्तदाज्ञया ।
आजग्मुरथ देशेभ्यः, सर्वेभ्यो ब्रह्मवादिनः ॥८॥
ऋषिरूपं महातेजा, विश्वामित्रोऽभ्यभाषत ।
अयमिक्ष्वाकुदायाद,-स्त्रिशंकुरिति विश्रुतः ॥९॥
धर्मिष्ठश्च वदान्यश्च, मां चैव शरणं गतः ।
स्वेनानेन शरीरेण, देवलोकजिगीषया ॥१०॥
यथाऽयं स्वशरीरेण, देवलोकं गमिष्यति ।
तथा प्रवर्त्यतां यज्ञो, भवद्भिश्च मया सह ॥११॥
ततः प्रववृते यज्ञः, संप्रहृष्टे ऋत्विजस्तदा ।
याजकश्च महातेजा, विश्वामित्रोऽभवत् क्रतौ ॥१२॥

ततः कालेन महता, विश्वामित्रो महातपाः।
चकाराऽऽवाहनं तत्र, भागार्थं सर्वदेवताः॥१
नाभ्यागमँस्तदा तत्र, भागार्थं सर्वदेवताः।
ऋषिः कोपसमाविष्टो, विश्वामित्रो महामुनिः॥१
स्रुवमुद्यम्य सक्रोध,-स्त्रिशंकुमिदमब्रवीत्।
पश्य मे तपसो वीर्यं, स्वार्जितस्य नरेश्वर!॥
एष त्वां स्वशरीरेण, नयामि स्वर्गमोजसा।
दुष्प्रापं स्वशरीरेण, स्वर्गं गच्छ नरेश्वर!॥
उक्तवाक्ये मुनौ तस्मिन्, सशरीरो नृपात्मजः।
दिवं जगाम काकुत्स्थ!, मुनीनां पश्यतां तदा।
स्वर्गलोकगतं दृष्ट्वा, त्रिशङ्कुं पाकशासनः।
सह सर्वैः सुरगणै,-रिदं वचनमब्रवीत्।
त्रिशङ्को! गच्छ भूयस्त्वं, नासि स्वर्गकृतालयः
गुरुशापहतो मूढ!, पत भूमिमवाक्शिराः।
एवमुक्तो महेन्द्रेण, त्रिशङ्कुरपतत्पुनः
विक्रोशमानस्त्राहीति, विश्वामित्रं तपोधनम्।
तच्छ्रुत्वा वचनं तस्य, क्रोशमानस्य कौशिकः
रोषमाहारयत्तीव्रं, तिष्ठ तिष्ठेति चाब्रवीत्॥२
सृजन्दक्षिणमार्गस्थान्, सप्तर्षीनपरान्पुनः।
नक्षत्रवंशमपर,-मसृजत् क्रोधमूर्छितः॥२

गगनं तान्यनेकानि, वैश्वानरपथाद् बहिः ।
नक्षत्राणि मुनिश्रेष्ठ,-स्तेषु ज्योतिष्षु चाकरोत् ॥२३॥
त्रिशङ्कुं तारकामध्ये, स्थापयामास चोज्ज्वलम् ।
कृतार्थं कीर्तिमन्तं च, स्वर्गलोकगतं यथा ॥२४॥

—रामायणात्

११—उत्तङ्ककथा

अथ कश्चिदपिधौम्यो नाम आपोदो बभूव । तस्य त्रयः शिष्या आसन् । एकं शिष्यं पाञ्चालदेशं प्रेषयामास । द्वितीयं च गवां रक्षणे नियोजयामास । अथापरः शिष्यस्तस्य वेदो नामाभवत् । तं धौम्यः समादिदेश । वत्स वेद ! इह स्थीयतां तावन्मम गृहे कंचित्कालं शुश्रूषुणा च त्वया भवितव्यं श्रेयो भविष्यति ते । स त्येवमुक्त्वा गुरुकुले दीर्घकालं गुरुसेवातत्परोऽवसत् । गौरिव त्य गुरुणा धूर्षु नियोज्यमानः शीतोष्णक्षुत्तृष्णादुःखसहः र्वत्राऽप्रतिकूलो गुरुं सिषेवे । महता कालेन गुरुः परितोषं गाम । तत्परितोषाच्च श्रेयः सर्वज्ञतां चाप । स उपाध्यायेनानुात तस्माद् गुरुकुलादभिवृत्तो गृहाश्रमं प्रत्यपद्यत । तस्यापि गृहे वसत. शिष्या बभूवु. । अथ कस्मिंश्चित्काले वधूपि वेदं मेजय. पौष्यश्च क्षत्रियावुपेत्य वरयित्वा पुरोहितं चक्रतुः । याज्यकार्येण प्रस्थितः उत्तङ्कनामानं शिष्यं नियोजयामास । यत्किंचिदस्मद्गृहे परिहीयते तदिच्छाम्यहं भवता क्रियमाणम् । यं प्रतिसंदिश्य वेदो यथार्थं प्रावसत् ।

अथोत्तङ्को गुरुनियोगमनुतिष्ठमानो वसति स्म । कालान्तरेण पुनरुपाध्यायस्तस्य गृहमाजगाम प्रवासात् । स तु सद्वृत्तं तस्याशेष-

मुपलभ्य प्रीतिमानभूत्। प्रीतश्चैनं प्रोवाच—किं ते प्रियंकरवाणीति। धर्मतो हि शुश्रूषितोऽस्मि भवता। तेन प्रीतिर्मे त्वयि। अनुजाने भवन्तं सर्वानेव कामानवाप्स्यसि गम्यताम्। एवमुक्त उत्तङ्कः प्रत्युवाच। सोऽहमनुज्ञातो भवता इच्छामि गुर्वर्थमभीष्टमुपहर्तुमिति। तमुपाध्यायः प्रोवाच वत्सोत्तङ्क! गच्छ प्रविश्यान्तर्गृहं पृच्छोपाध्यानियीं किमुपाहरामि। एषा यद्ब्रवीति तदुपाहरस्वेति। स गत्वाऽपृच्छदुपाध्यायिनीं। भगवति! गुरुणाऽनुज्ञातो गृहं गन्तुमिच्छामि। गुर्वर्थमभीष्टमुपाहृत्यानृणो गन्तुमिति। तदाज्ञापयतु भवती किमुपाहरामि गुर्वर्थम्। सोत्तङ्कं समादिशत्। गच्छ पौष्यं राजानं प्रति, कुण्डले भिक्षितुं ये तस्य क्षत्रियया पिनद्धे आनयस्व। चतुर्थेऽहनि मे व्रतं भविता। ताभ्यां कुण्डलाभ्यामाबद्धाभ्यां शोभमाना ब्राह्मणान्परिवेष्टुमिच्छामि व्रतदिने। तत्संपादयस्व। एवं कुर्वतः श्रेयस्ते भविता। एवमुक्तः प्रातिष्ठतोत्तङ्कः। स पथि गच्छन्नपश्यद् ऋषभमतिप्रमाणमधिरूढं महान्तं पुरुषम्। स पुरुष उत्तङ्कमभ्यभाषत। भोः उत्तङ्क! गोमयमस्य ऋषभस्य भक्षय। स एवमुक्तो नैच्छत्। तमाह पुरुषो भूयः। भक्षयस्वैतत्। मा विचारय। उपाध्यायेनापि ते भक्षितपूर्वमिति। उत्तङ्को बाढमित्युक्त्वा ऋषभस्य मूत्रं पुरीषं च भक्षयित्वाऽनुपविश्यैवोपस्पृश्याप: प्रतस्थे। यत्र स क्षत्रियः पौष्यस्तमुपेत्याभ्यनन्दद् आशीर्भिरुत्तङ्कः। अर्थी भवन्तमुपागतोस्मीति प्रोवाच। गुर्वर्थं कुण्डलयोरर्थेनागतोस्मि। तं प्रत्युवाच पौष्यः—प्रविश्यान्तःपुरं क्षत्रिया याच्यताम्। स प्रविश्यान्तःपुरं क्षत्रियां नापश्यत्। प्रतिनिवृत्य स पौष्यमुवाच। न युक्तं भवताऽनृतेनोपचरितुम्। न हि तेऽन्तःपुरे क्षत्रिया सन्निहिता नैनां पश्यामि। पौष्यः क्षणं विमृश्य प्रोवाच। नियतं भवानुच्छिष्टः। न हि सा क्षत्रिया उच्छिष्टेनाशुचिना शक्या द्रष्टुं पतिव्रतात्वात्। अथैव-

१२—शरद्वर्णनम्

अथ पद्मपलाशाक्षीं, मैथिलीमनुचिन्तयन् ।
उवाच वचनं रामो, लक्ष्मणं लक्ष्मिवर्धनम् ॥१॥
तर्पयित्वा सहस्राक्ष, सलिलेन वसुन्धराम् ।
निर्वर्तयित्वा सस्यानि, कृतकर्मा व्यवस्थितः ॥२॥
दीर्घगम्भीरनिर्घोषाः, शैलद्रुमपुरोगमाः ।
विसृज्य सलिलं मेघाः, परिशान्ता नृपात्मज ! ॥३॥
नीलोत्पलदलश्यामाः, श्यामीकृत्वा दिशो दश ।
विमदा इव मातङ्गाः, शान्तवेगाः पयोधराः ॥४॥
घनानां वारणानां च, मयूराणां च लक्ष्मण ! ।
नादः प्रस्रवणानां च, प्रशान्तः सहसाऽनघ ! ॥५॥
अभिवृष्टा महामेघैः, निर्मलाश्चित्रसानवः ।
अनुलिप्ता इवाभान्ति, गिरयश्चन्द्ररश्मिभिः ॥६॥
शाखासु सप्तच्छदपादपानां, प्रभासु ताराकनिशाकराणाम् ।
लीलासु चैवोत्तमवारणानां, श्रियं विभज्याद्य शरत्प्रवृत्ता ॥७॥
संप्रत्यनेकाश्रयचित्रशोभा, लक्ष्मीः शरत्कालगुणोपपन्ना ।
सूर्याग्रहस्तप्रतिबोधितेषु, पद्माकरेष्वभ्यधिकं विभाति ॥८॥
सप्तच्छदानां कुसुमोपगन्धी, षट्पादवृन्दैरनुगीयमानः,
मत्तद्विपानां पवनानुसारी, दर्पं विनेष्यन्नधिकं विभाति ॥९॥

अभ्यागतैश्चारुविशालपक्षैः, स्मरप्रियैः पद्मरजोवकीर्णैः ।
महानदीनां पुलिनोपयातैः, क्रीडन्ति हंसाः सह चक्रवाकैः ॥१०
मदप्रगल्भेषु च वारणेषु, गवां समूहेषु च दर्पितेषु ।
प्रसन्नतोयासु च निम्नगासु, विभाति लक्ष्मीर्बहुधा विभक्ता ॥११
मनोज्ञगन्धं प्रियकैरनल्पैः, पुष्पाग्रभारावनताग्रशाखैः ।
सुवर्णगौरैर्नयनाभिरामं,-रुद्योतितानीव वनान्तराणि ॥१८॥
व्यक्तं नभः शारदविधौतवर्णं, कृशप्रवाहानि नदीजलानि ।
कल्हारशीताः पवनाः प्रवान्ति, तमोविमुक्ताश्च दिशः प्रकाशाः ॥१३
न्यक्कन्यावराण्यपान्मविभूषितानि, बर्हाणि धीरोपगतानदीनां ।
निर्भर्त्स्यमाना इव मार्गमार्गैः, प्रयान्ति दीना विमना मयूराः ॥१४
विश्रास्य कारण्डवचक्रवाका,-महार्णवैर्भिन्नकटा गजेन्द्राः ।
सरस्सु पद्माम्बुजभूषणेषु, विक्षोभ्य विक्षोभ्य जलं पिबन्ति॥१५
व्यपेतपङ्कासु सवालुकासु, प्रसन्नतोयासु सगोकुलासु ।
ससारसारावविनादितासु, नदीषु हंसा निपतन्ति हृष्टाः ॥१६
अनेकवर्णाः सुविनष्टकाया, नवोद्भिदम्बुधरेषु नष्टाः ।
क्षुधार्दिता घोरविषा बिलेभ्यश्चिरोषिता विप्रसरन्ति सर्पाः ॥१७
रात्रिः शशाङ्कोदितसौम्यवक्त्रा, तारागणोन्मीलितचारुनेत्रा ।
ज्योत्स्नांशुकप्रावरणा विभाति, नारीव शुक्लाम्बरसंवृताङ्गी ॥१८
विपक्वशालिप्रसवानि भुक्त्वा, प्रहर्षिता सारसचारुपङ्क्तिः ।
नभः समाक्रामति शीघ्रवेगा, वातावधूता ग्रथितेव माला ॥१९

सुप्तैकहंसं कुमुदैरुपेतं, महाह्रदस्थं सलिलं विभाति।
घनैर्विमुक्तं निशि पूर्णचन्द्रं, तारागणाकीर्णमिवान्तरिक्षम्॥१

वेणुस्वरव्यञ्जिततूर्यमिश्रः, प्रत्यूषकालेऽनिलसंप्रवृत्तः।
संमूर्च्छितो गर्गरगोवृषाणा,-मन्योन्यमापूरयतीव शब्दः॥२

नवैर्नदीनां कुसुमप्रहासै,-र्व्याधूयमानैर्मृदुमारुतेन।
धौतामलक्षौमपटप्रकाशैः, कूलानि काशैरुपशोभितानि॥२

वनप्रचण्डा मधुपानशौण्डाः, प्रियान्विताः षट्चरणाः प्रहृष्टाः
वनेषु मत्ताः पवनानुयात्रां कुर्वन्ति पद्मासनरेणुगौराः॥२

जलं प्रसन्नं कुमुदप्रहासं, क्रौञ्चस्वनं शालिवनं विपक्वम्।
मृदुश्च वायुर्विमलश्च चन्द्रः, शंसन्ति वर्षव्यपनीतकालम्॥२४

सूर्यातपक्रामणनष्टपङ्का, भूमिश्चिरोद्घाटितसान्द्ररेणुः।
अन्योन्यवैरेण समायुतानामुद्योगकालोऽद्य नराधिपानाम्॥२५

—रामायणात्

१३—दस्युविकत्थनम्

(भासकवेश्चारुदत्तस्य तृतीयाङ्कात्)

चारुदत्तः—सखे! उपारूढोऽर्धरात्रः। स्थिरतिमिरा राजमार्गाः। निस्सम्पातपुरुषत्वात् प्रसुप्तेवोज्जयनी प्रतिभाति। कुतः—

असौ हि दत्त्वा तिमिरावकाश,-मस्तंगतो ह्यष्टमपक्षचन्द्रः।
तोयावगाढस्य वनद्विपस्य, विषाणकोटीव निमज्जमाना॥१॥

विदूषकः—सुष्ठु भवान् भणति। अन्तर्दधानचन्द्रलब्धावकाशोऽवतरतीव प्रासादादन्धकारः। तत् सुप्यताम् भवान्। अहमपि शये।

(प्रविश्याभरणसमुद्गहस्ता)

चेटी—आर्य्य मैत्रेय ! उत्तिष्ठोत्तिष्ठ।

विदूषकः—भवति ! किमेतत् ?

चेटी—इदं सुवर्णभाण्डं षष्ठ्यां सप्तम्यां वा परिवर्तयामि। अष्टमी खलु अद्य।

चारुदत्तः—इदं तद् वसन्तसेनायाः स्वकम्।

चेटी—आम्। भणतु भणतु भर्तृदारकः। गृह्णात्विति।

चारुदत्तः—मैत्रेय ! गृह्यताम्।

विदूषकः—किंनिमित्तमयमलङ्कारोऽभ्यन्तरचतुःशालं न प्रवेश्यते ?

चारुदत्तः—मूर्ख ! बाह्यजनधारितमलंकारं गृहजनो न स्पृशति। (चेट्यै स्वीयं प्रावारकं ददाति)

विदूषकः—का गतिः ? आनय गृह्णामि चोरैर्हरणीयम्। (चेटी पिटकं दत्त्वा निष्क्रान्ता)

भो ! किंनिमित्तं न प्रावारकस्तस्यै प्रदत्तः ?

चारुदत्तः—सानुक्रोशतया।

विदूषकः—इदानीं सानुक्रोशता ? अहं तु भरितगर्दभ इव भूम्यां प्रलुठामि।

चारुदत्तः—वयस्य ! मा मैवम्। निद्रा मां बाधते तूष्णीं भव।

विदूषकः—शेतां भवान् सुखप्रबोधाय। यावदहमपि स्वपिमि। (द्वावपि स्वपितः)

(ततः प्रविशति सज्जलकः)

सज्जलकः—एष भोः।

कृत्वा [illegible],
शिक्षाबलेन बलेन च कर्ममार्गम् ।
गच्छामि भूमिपरिसर्पणघृष्टपार्श्वो,
निर्मुच्यमान इव जीर्णतनुर्भुजङ्गः ॥ २ ॥

भोः । [illegible]
[illegible] ।

([illegible])

भोः !
कामं नीचमिदं वदन्तु रिपवः गुणेषु यत्नाः,
विश्वस्तेषु हि वञ्चनापरिभवः शौर्यं न कार्कश्यता ।
स्वाधीना वचनीयतापि तु वरं बद्धो न सेवाञ्जलि,-
र्मार्गश्चैव नरेन्द्रसौप्तिकवधे पूर्वं कृतो द्रौणिना ॥ ३ ॥

(विचिन्त्य)

लुब्धोऽर्थवान् साधुजनावमानी, वणिक् स्वकृत्यातिक[illegible]
यस्तस्य गेहं यदि नाम लप्स्ये, भवानि दुःखोपहतो न विधे[illegible]

यद्वा तद्वा भवतु । यावदारभे कर्म ।

देशः कोऽनुजलावसेकशिथिलच्छेदादशब्दो भवेत्,
भित्तीनां क्व नु दर्शितान्तरमुखः संधिः करालो भवेत् ।
क्षारक्षीणतया चलेष्टककृशं हर्म्यं क्व जीर्णं भवेत्,
कुत्र स्त्रीजनदर्शनं च न भवेत् स्वन्तश्च यत्नो भवेत् ॥ ४

(परिक्रम्यावलोक्य च)

इयं वास्तुविभागक्रिया । सोपस्नेहतया गृहविशिष्ट इव [illegible]
भवनविन्यासः । इह तावत् प्रवेशावकाशं करिष्ये । भोः कीदृ[illegible]
इदानीं सन्धिविच्छेदः स्यात् ?

सिंहाक्रान्तं पूर्णचन्द्रं झषास्यं,
चन्द्रार्धं वा व्यायतं वा त्रिकोणम्।
सन्धिच्छेदः पीठिका वा शशाङ्क,-
मस्मत्पक्ष्या [illegible] कार्यं [illegible] ॥ ६ ॥

भवतु। सिंहाक्रान्तमेव दर्शयिष्ये।

विदूषकः—भो! आगतो खलु भवान्? [illegible]।

चारुदत्तः—किमर्थम्?

विदूषकः—अहं खलु [illegible] इव [illegible] न लभे। [illegible]। [illegible] याति। [illegible]।

चारुदत्तः—मूर्ख! [illegible]।

[illegible] सुवर्णभाण्डम्? (प्रकाशमेव) [illegible] अभिप्रवर्तिष्यति।

व्यायाम [illegible] मया निशि [illegible],
[illegible] [illegible] [illegible]।
[illegible] [illegible] [illegible],
[illegible] मे [illegible] [illegible] [illegible] च। ७॥

[illegible] (प्रकाश) [illegible]

([illegible])

[illegible]

मार्जारः स्रवने वृकोऽपसरणे श्येनो गृहालोकने,
निद्रा सुप्तमनुष्यवीर्यतुलने संसर्पणे पन्नगः।
माया वर्णशरीरभेदकरणे वाग् देशभाषान्तरे,
दीपो रात्रिषु संकटे च तिमिरं वायुःस्थले नौर्जले ॥ ८ ॥

आगन्तुकत्वाद् अविदितसमृद्धिविस्तरः केवलं भवनप्रत्ययाद् इह प्रविष्टोऽस्मि। न चेदानीं कंचनपरिच्छदविशेषं पश्यामि किं नु खलु दरिद्र एवायम्? उताहो अयं संयमननिरर्थकं … धारयति। अथवा अभिज्ञातोऽयं भवनविन्यासः। उपभुक्तपूर्वेण विभवेन तावदनेन भवितव्यम्।

गया विभवमन्दोऽपि, जन्मभूमिव्यपेक्षया।
गृहविक्रयकालेऽपि, नीलस्नेहेन रक्षति ॥ ९ ॥

भवतु। पश्यामि तावत्। अथवा न मातु मया तुल्यावस्थः कुलपुत्र पीडयितव्यः। गच्छामि।

विदूषकः—भोः! गृहाणेदं सुवर्णभाण्डम्।

सज्जलकः—कथं सुवर्णभाण्डमित्याह? किं मां दृष्ट्वा भाषते आहोस्विन् मन्दलाघवात् स्वप्नायते? भवतु, विभावयामि (दृष्ट्वा) भूतार्थं सुप्त एवायम्।

निश्वासोऽस्य न शंकितो न विषमस्तुल्यान्तरं जायते,
गात्रं सन्धिषु दीर्घतामुपगतं शय्या प्रमाणाधिकम्।
दृष्टिर्गाढनिमीलिता न चपलं पक्ष्मान्तरं जायते,
दीपं नैव न मर्षयेदभिमुखः स्यात्स्वप्नगुप्तो यदि ॥ १० ॥

… नु खलु मम। अयं ज्योत्स्नावर्णितदेशे दीपशिखा स्फुटीक… रूपेण। गृहीतगृहीतमनेन सुवर्णभाण्डं। भवतु प्रातश्चा…

चेटी—(हस्तेन दर्शयन्ती) एतत् खलु।

विदूषकः—अविधा। द्वारात् पुनेश कुक्कुरेण प्रवेश-क भवति! आगच्छ। चारुदत्तस्य प्रियं निवेदयामि। (उप सृत्य) भोः चारुदत्त! प्रियं ते निवेदयामि।

चारुदत्तः—(बुद्‌ध्या) किं मे प्रियम्? ननु वसन्तसे प्राप्ता?

विदूषकः—न खलु वसन्तसेना। वसन्तसेनः प्राप्तः।

चारुदत्त—रदनिके! किमेतत्?

चेटी—भर्तृदारक! अस्माकं वृक्षवाटिकापक्षद्वारे संधिं छि चोरः प्रविष्टः।

चारुदत्तः—किं चोर प्रविष्टः?

विदूषकः—भोः वयस्य! सर्वथा त्वं मन्यसि। मूर्खो मैत्रेय अपण्डितो मैत्रेय इति। ननु मया शोभनं कृतं तत् सुवर्णभा तव हस्ते समर्पयता।

चारुदत्तः—किं भवता दत्तम्?

विदूषकः—अथ किम्?

चारुदत्तः—कस्यां वेलायाम्?

विदूषकः—अर्धरात्रे।

चारुदत्तः—किमर्धरात्रे? यादं दत्तम्।

विदूषकः—भोः चारुदत्त! यस्यां वेलायां प्रतिबुद्ध आसं तस्यां खलु वेलायां दत्तम्।

चारुदत्तः—हन्त हृतं सुवर्णभाण्डकम्।

कः श्रद्धास्याति भूतार्थं, सर्वो मां तुलयिष्यति।
शङ्कनीया हि दोषेषु, निष्प्रभावा दरिद्रता॥१

—भास

१४—उमाद्‌गमनम्

अथाजिनाषाढधरः प्रगल्भवाक्,
ज्वलन्निव ब्रह्ममयेन तेजसा।
विवेश कश्चिज्जटिलस्तपोवनं,
शरीरबद्धः प्रथमाश्रमो यथा॥ १॥
विधिप्रयुक्तां परिगृह्य सत्क्रियां,
परिश्रमं नाम विनीय च क्षणं।
उमां स पश्यन्नृजुनैव चक्षुषा,
प्रचक्रमे वक्तुमनुज्झितक्रमः॥ २॥
अपि क्रियार्थं सुलभं समित्कुशं,
जलान्यपि स्नानविधिक्षमाणि ते।
अपि स्वशक्त्या तपसि प्रवर्तसे,
शरीरमाद्यं खलु धर्मसाधनम्॥ ३॥
अनेन धर्मः सविशेषमद्य मे,
त्रिवर्गसारः प्रतिभाति भामिनि।
त्वया मनोनिर्विषयार्थकामया,
यदेक एव प्रतिगृह्य सेव्यते॥ ४॥
प्रयुक्तसत्कारविशेषमात्मना,
न मां परं संप्रतिपत्तुमर्हसि।
यतः सतां संनतगात्रि संगतं,
मनीषिभिः साप्तपदीनमुच्यते॥ ५॥

अतोऽत्र किंचिद्भवतीं बहुक्षमां,
द्विजातिभावादुपपन्नचापलः ।
अयं जनः प्रष्टुमनास्तपोधने,
न चेद्रहस्यं प्रतिवक्तुमर्हसि ॥ ६ ।

किमित्यपास्याभरणानि यौवने,
धृतं त्वया वार्धकशोभि वल्कलं ।
वद प्रदोषे स्फुटचन्द्रतारका,
विभावरी यद्यरुणाय कल्पते ॥ ७ ॥

कुले प्रसूतिः प्रथमस्य वेधस,-
स्त्रिलोकसौन्दर्यमिवोदितं वपुः ।
असृग्यमैश्वर्यसुखं नवं वय,-
स्तपः फलं स्यात्किमतः परं वद ॥ ८ ॥

दिवं यदि प्रार्थयसे वृथा श्रमः,
पितुः प्रदेशास्तव देवभूमयः ।
अथोपयन्तारमलं समाधिना,
न रत्नमन्विष्यति मृग्यते हि तत् ॥ ६ ॥

सखी तदीया तमुवाच वर्णिनं,
निबोध साधो ! तव चेत्कुतूहलं ।
यदर्थमम्भोजमिवोष्णवारणं,
कृतं तपस्साधनमेतया वपुः ॥१०॥

इयं महेन्द्रप्रभृतीनधिश्रिय,-
श्चतुर्दिगीशानवमत्य मानिनी।
अरूपहार्यं मदनस्य निग्रहा,-
त्पिनाकपाणिं पतिमाप्तुमिच्छति ॥११॥

यदा च तस्याधिगमे जगत्पते,-
रपश्यदन्यं न विधिं विचिन्वती।
तदा सहास्माभिरनुज्ञया गुरो,-
रियं प्रपन्ना तपसे तपोवनम् ॥१२॥

द्रुमेषु सख्या कृतजन्मसु स्वयं,
फलं तपस्साक्षिषु दृष्टमेष्वपि।
न च प्ररोहाभिमुखोऽपि दृश्यते,
मनोरथोऽस्याः शशिमौलिसंश्रयः ॥१३॥

अथाह वर्णी विदितो महेश्वर,-
स्तदर्थिनी त्वं पुनरेव वर्तसे।
अमंगलाभ्यासरतं विचिन्त्य तं,
तवानुवृत्तिं न च कर्तुमुत्सहे ॥१४॥

अवस्तुनिर्बन्धपरे कथं नु ते,
करोऽयमामुक्तविवाहकौतुकः।
करेण शंभोर्वलयीकृताहिना,
सहिष्यते तत्प्रथमावलम्बनम् ॥१५॥

त्वमेव तावत्परिचिन्तय स्वयं,
कदाचिदेते यदि योगमर्हतः।
वधूदुकूलं कलहंसलक्षणं,
गजाजिनं शोणितबिन्दुवर्षि च ॥१६॥

इयं च तेऽन्या पुरतो विडम्बना
यदूढया वारणराजहार्यया।
विलोक्य वृद्धोक्षमधिष्ठितं त्वया,
महाजनः स्मेरमुखो भविष्यति ॥१७॥

वपुर्विरूपाक्षमलक्ष्यजन्मता,
दिगम्बरत्वेन निवेदितं वसु।
वरेषु यद्बालमृगाक्षि मृग्यते,
तदस्ति किं व्यस्तमपि त्रिलोचने ॥१८॥

निवर्तयास्मादसदीप्सितान्मनः,
क्व तद्विधस्त्वं क्व च पुण्यलक्षणा।
अपेक्ष्यते साधुजनेन वैदिकी,
श्मशानशूलस्य न यूपसत्क्रिया ॥१९॥

उवाच चैनं परमार्थतो हरं,
न वेत्सि नूनं यत एवमात्थ माम्।
अलोकसामान्यमचिन्त्यहेतुकं,
द्विषन्ति मन्दाश्चरितं महात्मनाम् ॥२०॥

विपत्प्रतीकारपरेण मंगलं,
निषेव्यते भूतिसमुत्सुकेन वा ।
जगच्छरण्यस्य निराशिषः सतः,
किमेभिराशोपहतात्मवृत्तिभिः ॥२१॥

अकिंचनः सन्प्रभवः स संपदां,
त्रिलोकनाथः पितृसद्मगोचरः ।
स भीमरूपः शिव इत्युदीर्यते,
न सन्ति याथार्थ्यविदः पिनाकिनः ॥२२॥

विभूषणोद्भासि पिनद्धभोगि वा,
गजाजिनालम्बि दुकूलधारि वा ।
कपालि वा स्यादथवेन्दुशेखरं,
न विश्वमूर्तेरवधार्यते वपुः ॥२३॥

विवक्षता दोषमपि च्युतात्मना,
त्वयैकमीशं प्रति साधु भाषितम् ।
यमामनन्त्यात्मभुवोऽपि कारणं,
कथं स लक्ष्यप्रभवो भविष्यति ॥२४॥

अलं विवादेन यथाश्रुतस्त्वया,
तथाविधस्तावदशेषमस्तु सः ।
ममात्र भावैकरसं मनः स्थितं,
न कामवृत्तिर्वचनीयमीक्षते ॥२५॥

१५—अनुतापिकथा

कृत्वा दुष्टानि कर्माणि, निन्दित्वा धर्मसंचयम् ।
यः पश्चात्तप्यते लोकेऽत्र,-सुखभागी स [illegible] ॥ १ ॥

अस्ति भागीरथीतीरे [illegible] नाम नगरी । तत्र [illegible] नाम राजा बभूव । [illegible] पुत्रं [illegible] कुमारं राजानं [illegible] । स च युवा राज्यं प्राप्य [illegible] यौवनमदान्धान्यायप्रवृत्तो बभूव । तथा हि—

अनुरूपेण प्रेम्णा, कुलं तिष्ठति सीमनि ।
पूजितं पूजितेन स्याद्, विरूपेण विनश्यति ॥ २ ॥

अपि च—

परिश्रमेषु वित्तेषु, प्रादुर्भूते च यौवने ।
परीक्षितासु विद्यासु, मदः कस्य न जायते ॥ ३ ॥
स एव पुरुषः श्रेष्ठः, पूज्यो भवति धीमताम् ।
धनयौवनविद्याभि-र्गर्वं नाङ्गीकरोति यः ॥ ४ ॥
धने येन जितो गर्वो, यौवने मन्मथो जितः ।
तेन मानुषसिंहेन, जितं किं न महीतले ॥ ५ ॥

ततः स राजा धनिनां धनं हरंस्तल्लोभेन निरागसामपि प्राणहारकः प्रजानां पीडाकरो बभूव । ततः नैवैतदालोचितं यदयं राजा न भवति किन्तु दस्युः ।

उक्तं च—

लङ्घमानः स्थितिं दर्पान्मदान्ध इव कुञ्जरः ।
राजधर्मच्युतो राजा, दस्युरेव न संशयः ॥ ६ ॥

यद्ययमनेनापराधेनाभिद्रुह्यते तदा स्वामिद्रोहरूपं पापम् । यदि च सह्यते तदा विनाशः । तदस्मै मुनिद्वारा धर्मोपदेशः कारयितव्यः । इति निश्चित्य तैस्सचिवैः समाहूता मुनयः । मुनयश्च राजानमुपेत्य समुपादिशन् ।

धर्ममर्जय राजेन्द्र !, धर्मो राज्यस्य कारणम् ।
कथमन्ये नराः सर्वे, नरदेवः कथं भवान् ॥ ७ ॥

पूर्वजन्मनि भवता पुण्यं कृतम् । तस्य फलरूपमिदं निष्कण्टकराज्यं लब्धवान् । तदस्मिन्नपि जन्मनि पापान्निवृत्तः पुण्यं सञ्चिनु । राजा प्रोवाच—किं नाम पुण्यम् ? मुनयः प्रत्यूचुः—देव ! परद्रव्यापहरण-परदारापगमन-परहिंसानिवारणमिति निवृत्तिरूपम् । दया दान प्रजापरिपालन यज्ञव्रताचरणमिति प्रवृत्तिरूपम् । यत्कर्म च शास्त्रबोधितं तत्फलं पुण्यम् । राजोवाच—तेन किं क्रियते ? किमत्र प्रमाणम् ? मुनयः ऊचुः—त्रिवर्गः साध्यते । शास्त्राणि प्रमाणम् । परमेश्वर-प्रणीता । राजाऽवदत्—परमेश्वर एव नास्ति । कुतस्तत्प्रणीतानि शास्त्राणि ? यदि भवति तदोपलभ्येत मयाऽपि दृश्येत । नोपलभ्यते यतस्तस्मान्नास्त्येव परमेश्वरः । यूयं मुनयो मान्याः । कथं मामतथ्यैर्वचोभिः प्रतारयथ ?

ततस्तैर्मुनिभिर्बहिरागत्य परस्परमुक्तम् । यदयं राजा नास्तिकः खलु । ततो धर्मोपदेशो न भवति । कुत्र वा कापथप्रवृत्तानामुपदेशसाध्य इति सम्भवम् । ततस्ते मुनयः स्वं स्वं स्थानं जग्मुः । ततो मन्त्रिभिः परामृष्टम् । सुभटैश्च पर्यालोचितम् । अयं हि कुप्रभुः । केनाप्युपायेन राज्यपदाद्विः कर्तव्यः । कनीयानस्य भ्राता सद्वृत्तः । स एवास्माकं राजा भवतु । सर्वैस्तथा समाचरिते तस्यानुजो राजा बभूव ।

ततो भ्रातरि लब्धराज्ये सति भ्रात्रैवाहं हन्तव्योऽस्मीति भयेन प्रपलाय्य तपोवनं जगाम । सर्वैरमात्यादिभिः परित्यक्तोऽपि

निष्परिजनोऽपि दासीं न तत्याज। दास्या सह तपोवनेऽवमत् तपस्विनां वनादानीतानि कन्दमूलफलानि बलादाच्छिद्य खादति स्म। ततस्तत्र भ्राता त्वां व्यापादयितुमायातीति श्रावयित्वा त्रासितस्तपस्विभिः खेदितश्च भृशं तस्माद्वनाद्रेकेवैरयासहा निर्द्धनो निष्परिजनश्च प्राणभयेन गिरिगह्वरं विवेश। तत्र भक्षणोपयोगि वस्तूनामभावात् प्रत्यहं धन्वी शरप्रहारेण मृगान् व्यापादयन् व्याध इव मृगमांसेन जीवति स्म। एवं परमकष्टे ताभ्यां कियत्यपि समये नीयमाने तयोर्वस्त्राणि जीर्णानि। शीतकालश्च प्रत्यासन्नो बभूव। द्वयोरप्येक एव कम्बलः शीतत्राणकृते आसीत्, यदा तु पुरुषो मृगवधार्थी स्थानान्तरं गच्छति तदा द्वरेकः शिशिरेण पीड्यते। एकदा तु दास्या परमदुःखितयाऽभिहितः धिक् त्वां पुरुषाधम! राजकुलजातोऽपि स्वदोषेण राज्यात् परिभ्रष्टः सीदसि। मां चारण्यमानीय किमित्यवसादयसि। ततो मारय वा त्यज वा। नाहमीदृशं दुःखं सोढुं क्षमा। त्वं च शूरोऽपि कथमीदृशीं दशामनुभवसि?

उक्तं च—

पर्यङ्केण विना न यस्य शयनं यात्रा न वाहैर्विना,
कर्पूरेण विना न जातु समभूत्तांबूलपूर्णं मुखम्।
मायूरैर्व्यजनैर्विना न पवनः प्रायोऽभवत्प्रीतये,
स त्वं सीदसि लुब्धकप्रतिनिभीभूतः कथं मूर्खवत् ॥८॥

रत्नाङ्गद उवाच—भद्रे! मर्षय। सुसमयमपेक्षः पुरुषस्य विपत्प्रतीकारः। तस्मादुद्वेगो न कर्तव्यः। अस्यां तु रात्रौ त्वं गर्भप्रवेशया हिमपराभवं परिहर। अहं तु कम्बलमादाय द्वितीयकम्बलार्थं क्वापि गच्छामि। तुभ्यमचिरादेव कम्बलमानीय दास्यामि। एवं प्रतिज्ञाय कम्बलमादाय नगरं प्रातिष्ठत। नगरं

प्रविश्य कस्यचिद् ब्राह्मणस्य गृहे सन्धिं भित्त्वा सन्धिमुखात् प्रकाशनिवारणार्थं कम्बलं सन्धिमुखे धृत्वा अपरकम्बलार्थी गृहान्तः प्रविष्टः। यावदसौ सुप्तस्य ब्राह्मणस्य कम्बलमाकर्षति तावत्तस्य निद्राभङ्गो जातः। भग्ननिद्रं ब्राह्मणं ज्ञात्वा चौरो बहिर्निष्क्रान्तः। ब्राह्मणोऽपि 'रे रे चौराश्चौरं मारयतेति' मुहुरुच्चैर्वदन् निर्जगाम। तेन श्रमेण स्तेन स्वकीयं कम्बलं तत्रैव परित्यज्य दूरं पलायितः। पलायमानश्च परिश्रान्तः कियत्यपि दूरे स्थितः। शीतार्तश्च चिन्तयामास। अहो मयाऽपरकम्बलार्थमागतेन स्वकीय कम्बलोऽपि हारितः। तत्केन कृतमिदम्? कर्तुरिच्छाप्रयत्नाभ्यां विना क्रिया न संभवति। तत्कस्येच्छया प्रयत्नेन च मम कम्बलो गतः? यदि ममेच्छया भवति तदा ममैवाभीप्सितकम्बलस्य लाभः संपद्येत। तद् विपरीतं केन कृतम्? स सादृशस्त कश्चित्स्वभावः संसारे। मन्ये स एव परमेश्वरः। तमेवाराध्यत्वेन निर्दिशन्ति मुनय इति परिचितः पदार्थः। अहो कष्टं माहेन मयाऽद्यपर्यन्तं संसारकर्ताऽपि न परिचितः। तथा हि—

अबोधेनाप्तवाक्यानां, मदो दोषैर्मदादिभिः ।
मपि त्रैलोक्यनिर्माता, न ज्ञातः परमेश्वरः ॥ ९ ॥

पदिनानां हि कल्याणि ? अथवा सुन्दरमेतत् ।

प्रतिजन्म मनुष्याणां, क्षमारपापानि कुर्वताम् ।
यदा धर्मे भवेद् बुद्धि-स्तदेव दिवसं शुभम् ॥१०॥
यदैवारभ्यते धर्मः, स्वकृतदोषेण जन्तुना ।
तदादिरेव कालोऽस्ति, स्वर्गाय च शुभाय च ॥११॥
भेषजेन यथा व्याधि-रपगच्छति रोगिणः ।
पुण्येनापि तथा मन्ये, पापं नश्यति पापिनः ॥१२॥

न चौरो न तपस्वी वा, जातमात्रस्तु मानवः।
स्वस्वकर्मपरीणामाद्, यतिः स्तेनश्च कथ्यते ॥१३॥

एवं परामृश्य तपश्चरणपरायणो भवामीति कृतनिश्चयः
राजा वनात् तां शमीं करुणया पुरमानीय तत्याज। स्वयं च
चिन्तयामास।

ये याता दिवसा गता हि खलु ते नायान्ति यत्नात्पुनः
यास्यन्तोऽपि हि सन्ति हन्त बहवः कालः कुतः सावधिः।
अद्यारभ्य चराचरगुरोः शम्भोः पदाम्भोरुहे,
चेतः षट्पदयँ स्तमोविदलयम् नेष्यामि शेषं वयः

तस्माद्दिवसादारभ्य स महानुभावः परमतपस्वी बभूव।
—पुरुषपरीक्षातः

१६—विदुरनीतिः

आरोग्यमानृण्यमविप्रवासः, सद्भिर्मनुष्यैः सह संप्रयोगः।
स्वप्रत्यया वृत्तिरभीतवासः, षड् जीवलोकस्य सुखानि राजन्।
अष्टौ गुणा पुरुषं दीपयन्ति, प्रज्ञाऽभिजात्यं च दमः श्रुतं च।
पराक्रमश्चाऽबहुभाषिता च, दानं यथाशक्ति कृतज्ञता च ॥२॥
यः काममन्यू प्रजहाति राजा, पात्रे प्रतिष्ठापयते धनं च।
विशेषविच्छ्रुतवान् क्षिप्रकारी, तं सर्वलोकः कुरुते प्रमाणम्।३
जानाति विश्वासयितुं मनुष्यान्, विज्ञातदोषेषु दधाति दण्डम्।
जानाति मात्रां च तथा क्षमां च, तं तादृशं श्रीर्जुषते समग्रा ॥४

प्यापदं न व्यथते कदाचिद्, उद्योगमन्विच्छति चाप्रमत्तः।
खं च काले सहते महात्मा, धुरन्धरस्तस्य जिताः सपत्नाः॥५
। नोद्धतं कुरुते जातु वेषं, न पौरुषेणापि विकत्थतेऽन्यान्।
मूर्च्छितः कटुकान्याह किंचित्, प्रियं सदा तं कुरुते जनोघः॥६
वैरमुद्दीपयति प्रशान्तं, न दर्पमारोहति नास्तमेति।
दुर्गतोऽस्मीति करोत्यकार्यं, तमार्यशीलं परमाहुरार्याः॥७
स्वे सुखे वै कुरुते प्रहर्षं, नान्यस्य दुःखे भवति प्रहृष्टः।
त्वा च पश्चात् कुरुते न तापं, स कथ्यते सत्पुरुषार्यशीलः॥८
मं मोहं मत्सरं पापकृत्यं, राजद्विष्टं पैशुनं पूगवैरम्।
वोन्मत्तैर्दुर्जनैश्चापि वादं, यः प्रज्ञावान् वर्जयेत् स प्रधानः॥९
वैविवाहं कुरुते न हीनैः, समैः सख्यं व्यवहारं कथां च।
र्गैर्विशिष्टान् पुरतो दधाति, विपश्चितस्तस्य नयाः सुनीताः॥१०
तं भुंक्ते संविभज्याश्रितेभ्यो, मितं स्वपित्यमितं कर्म कृत्वा।
त्यमित्रेष्वपि याचितस्सन्, तमात्मवन्तं प्रजहत्यनर्थाः॥११
चीप्सितं विप्रकृतं च यस्य, नान्ये जनाः कर्म जानन्ति किंचित्।
न्त्रे गुप्ते सम्यगनुष्ठिते च, नाल्पोऽप्यस्य च्यवते कश्चिदर्थः॥१२
सर्वभूतप्रशमे निविष्टः, सत्यो मृदुर्मानकृच्छुद्धभावः।
तीव स ज्ञायते ज्ञातिमध्ये, महामणिर्जात्य इव प्रसन्नः॥१३
आत्मनाऽत्मत्रपते भृशं नरः, स सर्वलोकस्य गुरुर्भवत्युत।
नन्ततेजाः सुमनाः समाहितः, स तेजसा सूर्य इवावभासते॥१४

कृष्णोऽकरोत् ज्ञाने नायकं, कृष्णेन यदा स्वसारेण मम।
शमो मोक्षार्थकस्तेषु धीरः, कर्तव्यताम् गुरुणानम ॥
सुखं च दुःखं न ममाभ्यो न, लाभालाभौ समं जीवितं च।
धर्माधर्मः सर्वेषां स्पृहामि, तत्सत्रीणां न प्रवृत्तेषु मोदेत ॥
यस्मिन् यथा वर्ते ना मनुष्य स्वाभिमन्यता धीरत्वं न पदैः
मानापमानौ मानता वर्तितव्यः, मानापमानः मानुना मनुष्यैः ॥
यः शरीरं त्यजन्न्न गतः आत्मा नित्यं निर्विकारमेव गतः।
धीरमनाः श्रमणो मत्यो-दर्शनैः सुखं यान्ति स्थीर धीरः ॥
—हनुमन्नाटक

१७—नाट्याचार्ययोः संघर्षः

(नेपथ्ये) अलं बहु विवादेन । राजा मममेवान्तर्ये रचनानाट्यविधिर्भविष्यति ।

राजा—(आकर्ण्य) सखे ! त्वम् सुनीतिवादपरः पुष्पबुद्धिरसि ।

विदूषकः—फलमपि द्रक्ष्यसि ।

(ततः प्रविशति कञ्चुकी)

कञ्चुकी—देव ! पत्नी हरदत्तगणदासौ—

उभावभिनयाचार्यौ, परस्परजयैषिणौ ।
त्वां द्रष्टुमुद्यता साक्षाद्, भावाविव शरीरिणौ ॥ १ ॥

राजा—प्रवेशय तौ ।

वृषोन्कया ज्ञायते जातरूपं, वृत्तेन धर्मो व्यवहारेण सा
शूरो भयेष्वर्थकृच्छ्रेषु धीरः, कृच्छ्रेष्वापत्सु सुहृदश्चारयश्च ।
सुखं च दुःखं च भवाभवौ च, लाभालाभौ मरणं जीवितं
पर्यायशः सर्वमेते स्पृशन्ति, तस्माद्धीरो न प्रहृष्येत्र शोचे
यस्मिन् यथा वर्तते यो मनुष्य-स्तस्मिंस्तथा वर्तितव्यं स ध
मायाचारो मायया वर्तितव्यः, साध्वाचारः साधुना प्रत्युपे
रथः शरीरं पुरुषस्य राज-न्नात्मा नियन्तेन्द्रियवर्गमश्वाः
वैरप्रमत्तः कुशली सदश्वै-र्दान्तैः सुखं याति रथीव धीरः

—महाभार

१७—नाट्याचार्ययोः संघर्षः

(नेपथ्ये) अलं बहु विकथ्य । राज्ञः समक्षमेवा
रयोरन्तरव्यक्तिर्भविष्यति ।

राजा—(आकर्ण्य) सखे ! त्वत् सुनीतिपादपस्य
पुष्पितम् ।

विदूषकः—फलमपि द्रक्ष्यसि ।

(ततः प्रविशति कञ्चुकी)

कञ्चुकी—देव ! एतौ हरदत्तगणदासौ—

उभावभिनयाचार्यौ, परस्परजयैषिणौ ।
त्वां द्रष्टुमुद्यता साक्षाद्, भावाविव शरीरिणौ ॥

राजा—प्रवेशय तौ ।

महासारप्रसवयोः, सदृशक्षमयोर्द्वयोः ।
धारिणी-भूधारिण्यो-र्भव भर्ता शरच्छतम् ॥ ४ ॥

धारिणी—जयतु जयतु आर्यपुत्रः ।

राजा—स्वागतं देव्यै ।

(परिव्राजिकां विलोक्य)

राजा—भगवति ! क्रियतामासनपरिग्रहः ।

(सर्वे उपविशन्ति)

राजा—भगवति ! अत्रभवतोर्हरदत्तगणदासयोः परस्परं विज्ञानसंघर्षिणोर्भगवत्या प्राश्निकपदमध्यासितव्यम् ।

परिव्रा०—अलमुपालम्भेन । पत्तने विद्यमाने ग्रामे रत्नपरीक्षा ।

राजा—नैतदेवम् । पण्डितकौशिकी खलु भगवती । पक्षपातिनावनयोरहं देवी च ।

आचार्यौ—सम्यगाह देवः । मध्यस्था भगवती नौ गुणदोषतः परिच्छेत्तुमर्हति ।

राजा—तेन हि प्रस्तूयतां विवादः ।

परिव्रा०—देव ! प्रयोगप्रधानं हि नाट्यशास्त्रम् । किमत्र वाग्व्यवहारेण ? कथं वा देवी मन्यते ?

धारिणी—यदि मां पृच्छसि । तदेतयोर्विवाद एव न मे रोचते ।

गणदासः—देवि ! न मां समानविद्यतया परिभवनीयमवगन्तुमर्हसि ।

विदू०—भोः प्रेक्षामहे उरभ्रसम्वादम् । किं मुधा वेतनदानेन एतयोः ?

धारिणी—ननु कलहप्रियोऽसि ?

विदूषकः—शृणोतु भवान्भणाति ।

राजा—मौद्गल्य ! अमुं प्रस्तावं निवेद्य पण्डितकौशिक्या सार्धमाहूयतां देवी ।

कञ्चुकी—यदाज्ञापयति देवः ।

(निष्क्रम्य परिव्राजिकया देव्या च सह प्रविश्य)

कञ्चुकी—इत इतो भवत्यौ ।

धारिणी—(परिव्राजिकां विलोक्य) भगवति ! हरदत्तस्य गणदासस्य च संरम्भं कथं प्रेक्षसे ?

परिव्राजिका—अलं स्वपक्षावसादशंकया । न परिहीयते प्रतिवादिनो गणदासः ।

धारिणी—यद्यपि एवं तथापि राजपरिग्रहोऽस्य प्रमुखत्वमुपहरति।

परिव्रा०—अयि ! राज्ञीशब्द-भाजनमात्मानमपि चिन्तयतु भवती । पश्य—

अतिमात्रभासुरत्वं, पुष्यति भानोः परिग्रहादनलः ।
अधिगच्छति महिमानं, चन्द्रोऽपि निशापरिगृहीतः ॥२॥

विदू०—अविधा । अविधा । उपस्थिता देवी पीठमर्दिकां पण्डितकौशिकीं पुरस्कृत्य तत्रभवती धारिणी ।

राजा—पश्याम्येनां यैषा—

मंगलालंकृता भाति, कौशिक्या यतिवेषया ।
त्रयी विग्रहवत्येव, सममध्यात्मविद्यया ॥ ३ ॥

परिव्रा०—(उपेत्य) विजयतां देवः ।

राजा—भगवति ! अभिवादये ।

परिव्रा०—

विदू०—मा एवं भण्ड ! अन्योन्यकलहप्रिययोर्मध्यस्थैरेकतरस्मिन्ननिर्जिते कुत्र उपशमः ?

राजा—ननु स्वाङ्गसौष्ठवातिशयत्वमर्यादं प्रवक्ती भगवती।

परिव्रा०—अथ किम् ?

राजा—यदिदानीमतः परं किमाभ्यां प्रत्याययितव्यम् ?

परिव्रा०—तदेव वक्तुकामाऽस्मि।

शिष्टा क्रिया कस्यचिदात्मसंस्था,
संक्रान्तिरन्यस्य विशेषयुक्ता।
यस्योभयं साधु स शिक्षकाणां,
धुरि प्रतिष्ठापयितव्य एव ॥ ५ ॥

विदू०—एष पिण्डितार्थः। उपदेशदर्शनान्निर्णय इति।

हरदत्तः—परमभिमतं नः।

गणदासः—देवि ! एवं स्थितम्।

धारिणी—यदा पुनर्मन्दमेधसः शिष्या उपदेशं मलिनयन्ति, तदा आचार्य्यस्य दोषो नु ?

राजा—देवि ! एवमापद्यते। विनेतुरद्रव्यपरिग्रहोऽपि बुद्धिलाघवं प्रकाशयति।

धारिणी—(गणदासं विलोक्य) अलमार्यपुत्रस्योत्साहकारणं मनोरथं परिपूर्य्य। विरम निरर्थकादस्मात्।

विदू०—सुष्ठु भणति देवी। भोः गणदास ! संगीतकपदोपलम्भात् सरस्वत्या उपायनमोदकान् स्वादतः किं ते सुलभनिग्रहेण विवादेन।

विदू०—मा एवं पण्डित ! अन्योन्यकलहप्रिययोर्मत्तहस्तिनो रेकतरस्मिन्ननिर्जिते कुत उपशमः ?

राजा—ननु स्वाङ्गसौष्ठवातिशयमुभयोर्भवती साक्षी।

परिव्रा०—अथ किम् ?

राजा—तदिदानीमनयोः परं किमाभ्यां प्रत्याययितव्यम् ?

परिव्रा०—तदेव वक्तुकामास्मि।

शिष्टा क्रिया कस्यचिदात्मसंस्था,
संक्रान्तिरन्यस्य विशेषयुक्ता।
यस्योभयं साधु स शिक्षकाणां,
धुरि प्रतिष्ठापयितव्य एव ॥ ५ ॥

विदू०—एष पिण्डितार्थः। उपदेशदर्शनान्निर्णय इति।

हरदत्तः—परममिमतं नः।

गणदासः—देवि ! एवं स्थितम्।

धारिणी—यदा पुनर्मन्दमेधसः शिष्या उपदेशं मलिनयन्ति, तदा आचार्य्यस्य दोषो नु ?

राजा—देवि ! एवमापद्यते। विनेतुरद्रव्यपरिग्रहोऽपि बुद्धिलाघवं प्रकाशयति।

धारिणी—(गणदासं विलोक्य) अलमार्यपुत्रस्योत्साहकारणं मनोरथं परिपूर्य्य। विरम निरर्थकादारम्भात्।

विदू०—सुष्ठु भणति देवी। भोः गणदास ! संगीतकपदोपलब्धान् सरस्वत्या उपायनमोदकान् खादतः किं ते सुलभनिग्रहेण विवादेन।

१८—मेघोदयः

मेघो जलार्द्रमहिषादरभृङ्गनीलो,
विद्युत्प्रभा-रचित-पीत-पटोत्तरीयः ।
आभातिसंहत-बलाक-गृहीत-शंखः,
खं केशवोऽपर इवाक्रमितुं प्रवृत्तः ॥ १ ॥

एता निषिक्तरजतद्रवसन्निकाशा,
धारा जवेन पतिता जलदोदरेभ्यः ।
विद्युत्प्रदीपशिखया क्षणनष्टदृष्टाः,
छिन्ना इवाम्बरपटस्य दशाः पतन्ति ॥ २ ॥

संसक्तै रिव चक्रवाकमिथुनैर्हंसैः प्रडीनैरिव,
व्याविद्धैरिव मीनचक्रमकरैर्हर्म्यैरिव प्रोच्छ्रितैः ।
तैस्तैराकृतिविस्तरैरनुगतैर्मेघैः समभ्युन्नतैः,
पत्रच्छेद्यमिवेह भाति गगनं विश्लेषितैर्वायुना ॥ ३ ॥

गर्जन्ति शैलशिखरेषु विलम्बिबिम्बा,
मेघा वियुक्तवनिता हृदयानुकाराः ।
येषां रवेण सहसोत्पतितैर्मयूरैः,
खं वीज्यते मणिमयैरिव तालवृन्तैः ॥ ४ ॥

पवन-चपल-वेगः स्थूलधाराशरौघः,
स्तनित-पटह-नादः स्पष्टविद्युत्पताकः ।

हरति करसमूहं खे शशाङ्कस्य मेघो,
नृप इव पुरमध्ये मन्दशौर्यस्य शत्रोः ॥ ५ ॥

एते हि विद्युद्गुणबद्ध-कक्षा,
गजा इवान्योन्यमभिद्रवन्तः ।
शक्राज्ञया वारिधराः सधारा,
गां रूप्य-रज्ज्वेव समुद्धरन्ति ॥ ६ ॥

महावाताध्मातैर्महिषकुलनीलैर्जलधरैः,
चलैर्विद्युत्पक्षैर्जलधिभिरिवान्तः प्रचलितैः ।
इयं गन्धोद्दामा नवहरितशस्याङ्कुरवती,
धरा धारापातैर्मणिमयशरैर्भिद्यत इव ॥ ७ ॥

एह्ये हीति शिखण्डिनां पटुतरं केकाभिराक्रन्दितः,
प्रोड्डीयेव बलाकया सरभसं सोत्कण्ठमालिङ्गितः ।
हंसैरुज्झितपङ्कजैरतितरां सोद्वेगमुद्वीक्षितः,
कुर्वन्नञ्जनमेचका इव दिशो मेघः समुत्तिष्ठते ॥ ८ ॥

गता नाशं तारा उपकृतमसाधाविव जने,
वियुक्ताः कान्तेन स्त्रिय इव न राजन्ति ककुभः ।
प्रकामान्तस्तप्तं त्रिदशपतिशस्त्रस्य शिखिना,
द्रवीभूतं मन्ये पतति जलरूपेण गगनम् ॥ ९ ॥

उन्नमति नमति वर्षति,
गर्जति मेघः करोति तिमिरौघम् ।

प्रथमश्रीरिव पुरुषः,
करोति रूपाण्यनेकानि ॥१०॥

विद्युद्भिर्ज्वलतीव संविहसतीवोच्चैर्बलाकाशतैः,-
माहेन्द्रेण विवल्गतीव धनुषा धाराशरोद्गारिणा ।
विस्पष्टाशनिनिस्वनेन रसतीवाघूर्णतीवानिलैः,
नीलैः सान्द्रमिवाहिभिर्जलधरैर्धूपायतीवाम्बरम् ॥११॥

—मृच्छकटिकात्।

१९—कुमारसमुदाचारः

(कुन्दमालाया पञ्चमाङ्कात्)

रामः—(कुमारावुद्दिश्य) एष भवतोः सौन्दर्यावलोकजनितेन कुतूहलेन प्रनायमानः पृच्छामि । कतमो वर्ण आश्रमो वा भवतोर्जन्मदीक्षाभ्यामलंक्रियते ?

कुशः—(संभ्रमा [illegible])

लवः—द्वितीयो वर्णः प्रथम आश्रमः ।

रामः—अथ क्षत्रियकुलोपनामधेयौ सूर्याचन्द्रमसोः को वा भवतोर्वंशस्य कर्ता ?

लवः—भगवान् सहस्रदीधितिः ।

रामः—कथम् । अस्मत्समानाभिजनौ संवृत्तौ ।

विदूषकः—द्वयोरप्येकमेव प्रतिवचनम् ।

रामः—अप्यस्ति युवयोर्मिथः सम्बन्धः ?

लवः—भ्रातरावावां सोदर्यौ।

रामः—संवादी सन्निवेशः। वयसस्तु न किंचिदन्तरम्?

लवः—आवां यमलौ।

रामः—संप्रति युज्यते। ननु को भवतोर्ज्यायान्, किं च नामधेयम्?

लवः—(कुशं अञ्जलिना निर्दिश्य) आर्यस्य पादपूजायां लव इत्यात्मानं श्रावयामि। आर्योऽपि गुरुचरणवन्दनायां (विस्मरणं नाटयति)

कुशः—अहमपि आत्मानं कुश इति श्रावयामि।

रामः—अहो उदात्तो रम्यश्च समुदाचारः।

विदू०—ज्ञातं नामधेयम्। को ज्येष्ठ इति न दत्तं प्रतिवचनम्।

रामः—ननु अञ्जलिनिर्देशाद् अनामग्रहणाच्च दत्तमेव प्रतिवचनं 'कुशो ज्यायान्' इति।

विदू०—साधु। ज्ञातं सांप्रतम्।

रामः—किंनामधेयो भवतोर्गुरुः?

लवः—ननु भगवान् वाल्मीकिः।

रामः—केन संबन्धेन?

लवः—उपनयनोपदेशेन।

रामः—अहमत्रभवतोः शरीरस्य धातारं पितरं वेदितुमिच्छामि।

लवः—न हि जानाम्यस्य नामधेयम्। न कश्चिदस्मिंस्तपोवने तस्य नाम व्यवहरति।

रामः—अहो माहात्म्यम्।

कुशः—जानाम्यस्य नामधेयम् ।

रामः—कथ्यताम् ।

कुशः—निरनुक्रोशो नाम ।

रामः—(विदूषकमवलोक्य) अपूर्वं खलु नामधेयम् ।

विदू०—(विचिन्त्य) एवं तावत् पृच्छामि (कुशं प्रति निरनुक्रोश इति क एवं भणति ?

कुशः—अम्बा ।

विदू०—किं कुपिता एवं भणति ? उत प्रकृतिस्था ?

कुशः—यद्यावयोर्बालभावजनितं किंचिदविनयं पश्यति तदै मधिक्षिपति—'निरनुक्रोशस्य पुत्रौ मा चापलम्' इति ।

विदू०—एतयोर्यदि पितुर्निरनुक्रोश इति नामधेयम् । एत जननी तेनावमानिता निर्वासिता । तस्याप्रभवन्ती एतेन वचे दारकं निर्भर्त्सयति ।

रामः—सम्यगुपलक्षितं कौशिकेन । (निःश्वस्य स्वगतं धिङ् मामेवंभूतम् । सा तपस्विनी मत्कृतेनापराधेन स्वाप मेवं मन्युगर्भैरक्षरैर्निर्भर्त्सयति । (सवाष्पमवलोकयति) सन्निहितस्तत्रभवान् निरनुक्रोशो युष्मदाश्रमे ?

लवः—न सन्निहितः ।

रामः— ससम्भ्रमम्) अपि श्रूयते ?

लवः—(कुशमवलोकयति)

कुशः—न तस्य पादावस्माकं नमस्कृतपूर्वौ । अम्बायाः उ रेकवेणीधरया उच्छ्वासितानि तं प्रति ।

रामः—किं वा भवन्तौ तेनाभातपूर्वौ ?

कुशः—यदि नाम्येव ।

रामः—अतिदीर्घप्रवासोऽयम् दारुणश्च यदियता कालेन नाम परस्परलोचनगोचरमपि नावतीर्णा यूयम् । (विदूषकमुद्दिश्य) सखे ! कुतूहलेनाविष्टो मातरमनयोर्नामतो वेदितुमिच्छामि । न युक्तं च मम स्त्रीगतमनुयोक्तुम् । विशेषतस्तपोवने । तत्कोऽत्राभ्युपायः ?

विदू०—(कर्णे) अप्रतिहतवचना खलु ब्राह्मणजातिः । अहं पुनः प्रष्टुं शक्नोमि । (प्रकाशम्) भो किंनामधेया युवयोर्जननी ?

लवः—तस्य द्वे नामनी ।

विदू०—कथमिव ?

लवः—तपोवनवासिनो देवीतिशब्देनाह्वयन्ति भगवान्वाल्मीकिर्वधूरिति ।

रामः—कतमं क्षत्रियकुलं वाल्मीकिमुनिमुखविनिर्गतेन वधूशब्देन वर्धते ?

विदू०—विस्तीर्णं क्षत्रियकुलं न ज्ञायते कतममिति ।

रामः—अपि कुमारयोरनयोरस्माकं च सर्वाकारसंवादी कुटुम्बवृत्तान्तः । एतयोः सीतात्यागस्य च तुल्यः कालातिपातः । एतावपि क्षत्रियौ सूर्यान्वयौ । पितरि चानयोर्दारुणत्वसूचनो निरनुक्रोशशब्दः । मातुश्च माहात्म्यविभावनो देवीशब्दः । सर्वथाहमनेन सादृश्यबाहुल्येन पर्याकुलोऽस्मि मन्दभाग्यः । (विक्लवीभूत्वा)

एतत्कुमारयुगलं वयसाऽन्वयेन,
श्यामोन्नतेन वपुषा विपदाऽनया च ।
तां मैथिलीं तनयसम्भविनीमवस्थां,
संस्मृत्य मामतितरां तरलीकरोति ॥१॥

—दिङ्नागाचार्यस्य

२०—सुभाषितानि

विद्या नाम नरस्य रूपमधिकं प्रच्छन्नगुप्तं धनं,
विद्या भोगकरी यशःसुखकरी विद्या गुरूणां गुरुः।
विद्या बन्धुजनो विदेशगमने विद्या परा देवता,
विद्या राजसु पूज्यते न हि धनं विद्याविहीनः पशुः॥१॥

केयूरा न विभूषयन्ति पुरुषं हारा न चन्द्रोज्ज्वला,
न स्नानं न विलेपनं न कुसुमं नालंकृता मूर्धजा।
वाण्येका समलंकरोति पुरुषं या संस्कृता धार्यते,
क्षीयन्ते खलु भूषणानि सततं वाग्भूषणं भूषणम्॥२॥

जाड्यं धियो हरति सिञ्चति वाचि सत्यं,
मानोन्नतिं दिशति पापमपाकरोति।
चेतः प्रसादयति दिक्षु तनोति कीर्तिं,
सत्संगतिः कथय किं न करोति पुंसाम्॥३॥

पद्माकरं दिनकरो विकची करोति,
चन्द्रो विकासयति कैरवचक्रवालम्।
नाभ्यर्थितो जलधरोऽपि जलं ददाति,
सन्तः स्वयं परहिते विहिताभियोगाः॥४॥

पापान्निवारयति योजयते हिताय,
गुह्यं निगूहति [illegible]
आपद् गतं च न जहाति ददाति काले,
[illegible] प्रवदन्ति

भवन्ति नम्रास्तरवः फलोद्गमैः,-
नवाम्बुभिर्भूरि विलम्बिनो घनाः ।
अनुद्धताः सत्पुरुषाः समृद्धिभिः,
स्वभाव एवैष परोपकारिणाम् ॥६॥

विपदि धैर्यमथाभ्युदये क्षमा,
सदसि वाक्पटुता युधि विक्रमः ।
यशसि चाभिरुचिर्व्यसनं श्रुतौ,
प्रकृतिसिद्धमिदं हि महात्मनाम् ॥७॥

अकरुणत्वमकारणविग्रहः,
परधने परयोषिति च स्पृहा ।
सुजनबन्धुजनेष्वसहिष्णुता,
प्रकृतिसिद्धमिदं हि दुरात्मनाम् ॥८॥

करे श्लाघ्यस्त्यागः शिरसि गुरुपादप्रणयिता,
मुखे सत्या वाणी विजयिभुजयोर्वीर्यमतुलम् ।
हृदि स्वच्छा वृत्तिः श्रुतमधिगतं च श्रवणयो,-
र्विनाऽप्यैश्वर्येण प्रकृतिमहतां मण्डनमिदम् ॥९॥

प्रदानं प्रच्छन्नं गृहमुपगते संभ्रमविधिः,
प्रियं कृत्वा मौनं सदसि कथनं चाप्युपकृतेः ।
अनुत्सेको लक्ष्म्यां निरभिभवसाराः परकथाः,
सतां केनोद्दिष्टं विषममसिधाराव्रतमिदम् ॥१०॥

मनसि वचसि काये पुण्यपीयूषपूर्णा,-
त्रिभुवनमुपकारं श्रेणिभिः प्रीणयन्तः ।
परगुणपरमाणून् पर्वतीकृत्य नित्यं,
निजहृदि विकसन्तः सन्ति सन्तः कियन्तः ? ॥११॥

निन्दन्तु नीतिनिपुणा यदि वा स्तुवन्तु,
लक्ष्मीः समाविशतु गच्छतु वा यथेष्टम् ।
अद्यैव वा मरणमस्तु युगान्तरे वा,
न्याय्यात् पथः प्रविचलन्ति पदं न धीराः ॥१२॥

ऐश्वर्यस्य विभूषणं सुजनता शौर्यस्य वाक्संयमो,
ज्ञानस्योपशमः श्रुतस्य विनयो वित्तस्य पात्रे व्ययः ।
अक्रोधस्तपसः क्षमा प्रभवितुर्धर्मस्य निर्व्याजता,
सर्वेषामपि सर्वकारणमिदं शीलं परं भूषणम् ॥१३॥

यावत्स्वस्थमिदं शरीरमरुजं यावज्जरा दूरतो,
यावच्चेन्द्रियशक्तिरप्रतिहता यावत्क्षयो नायुषः ।
आत्मश्रेयसि तावदेव विदुषा कार्यः प्रयत्नो महान्,
संदीप्ते भवने तु कूपखननं प्रत्युद्यमः कीदृशः ॥१४॥

महेश्वरे वा जगतामधीश्वरे,
जनार्दने वा जगदन्तरात्मनि ।
न वस्तुभेद-प्रतिपत्तिरस्ति मे,
तथापि भक्तिस्तरुणेन्दुशेखरे ॥१५॥

—भर्तृहरेः

२१—विवाहसंलापः

(विद्धशालभञ्जिकाया द्वितीयाङ्कात्)

(ततः प्रविशतश्चेट्यौ)

कुरङ्गिका—हला तरङ्गिके ! हृदयप्रविष्टराजाज्ञेव लक्ष्यसे यदिदानीं सम्मुखागतामपि मामनालाप्य प्रचलितासि ।

तरङ्गिका—सखि कुरङ्गिके ! मा कुप्य । गौरी मे कुप्यतु यदि मया दृष्टासि अन्यहृदयत्वेन ।

कुरङ्गिका—अपि कीदृशं ते अन्यहृदयत्वम् ?

तरङ्गिका—सादरं यादृशेन तथापि पुरतो मन्त्रयन्त्या उत्कम्पते हृदयम् ।

कुरङ्गिका—हृदयनिर्विशेषे जने आशंकेति कौतूहलं मां प्रच्छयति ।

तरङ्गिका—यद्वा तद्वा भवतु । न प्रच्छादयिष्ये । न हि स्नेहो पुष्पायुक्तमनुरुध्यते ।

कुरं०—अतएव मे विश्वासः । कथमिव सहकारयष्ट्यां कलकण्ठी कोकिला कुण्ठितप्रणया ।

तरं०—अस्त्येवम् । तथापि एवं भण्यते मन्त्रस्य रक्षणं कार्यसिद्धेर्लक्षणमिति ।

कुरं०—मैवं भण । कथमिव जीवतः कृकलासान् शिरस्सुवर्णं प्राप्यते ।

तरं०—तच्छृणोतु प्रियसखी । अस्त्यत्र कुन्तलेशचण्डमहासेनो राजा । तस्य निजराज्यपरिभ्रंशेनेहागतस्य सुता कुवलयमाला नाम । सा नर्मदामज्जनोत्तीर्णा देवेन दृष्टा हृदयं चास्य प्रविष्टा । तां च प्रतीष्टवती देवी निजमातुलचन्द्रवर्मसुतस्य

मृगाङ्कवर्मण: कृते । नाद्यापि न निवर्तितवत्यसि [illegible] प्रेषिताऽस्मि । मद्गमनमन्तरा मया न त्वं प्रेक्षिताऽसि ।

कुरं०—अहो देव्या वैचक्षण्यम् । एवं किल कृते [illegible] प्रतिकूलो भवति । चन्द्रवर्मासुते च स्नेहः दर्शितो भवति ।

मकं०—त्वं पुनः कुत्र प्रस्थिताऽसि ?

कुरं०—अद्य देव्या अलीकविवाहेन विडम्बयितुमारब्धः नारायणः । तस्य विवाहनालमभीप्सितुमहं प्रेषिता । तद् आवां यथासमीहितसिद्धये गच्छावः ।

(इति निष्क्रान्ते)

—गद्यरत्न

२२—अन्योक्तयः

पुरा सरसि मानसे विकचसार सालिस्खलत्,
परागसुरभीकृते पयसि यस्य यातं वयः ।
स पल्वलजलेऽधुना मिलदनेकभेकाकुले,
मराल-कुल-नायकः कथय रे कथं वर्तताम् ॥१॥

कमलिनि मलिनी करोषि चेतः,
किमिति वकैरवहेलितानभिज्ञैः ।
[illegible]
जगति भवन्तु चिरायुषो मिलिन्दाः ॥२॥

मृगाङ्कवर्मणः कृते। तन्निमित्तं च विवाहोपकरणानि म
प्रेषिताऽस्मि। तद्गतमनसा मया न त्वं प्रेक्षिताऽसि।

कुरं०—अहो देव्या वैचक्षण्यम्। एवं किल कृते मम
प्रतिकृतो भवति। चन्द्रवर्ममातुले च स्नेहो दर्शितो भवति।

तरं०—त्वं पुनः कुत्र प्रस्थिताऽसि ?

कुरं०—अद्य देव्या अलीकविवाहेन विडम्बयितुमारब्
चारायणः। तस्य विवाहसामग्रीमुत्पादयितुमहं प्रेषिता।
अप्यावां यथासमीहितसिद्धयै गच्छावः।

(इति निष्क्रान्ते)

—राज

पुरा

।

भू।

धन्या जगद्धितमयी मनसः प्रवृत्तिः,
रम्यैव कापि रचना वचनावलीनाम्।
लोकोत्तरा च कृतिराकृतिरार्तहृद्या,
विद्यावतां सकलमेव गिरां गरीयः॥८॥

हालाहलं खलु पिपासति कौतुकेन,
कालानलं परिचुचुम्बिषति प्रकामम्।
व्यालाधिपं च यतते परिरब्धुमद्धा,
यो दुर्जनं वशयितुं तनुते मनीषाम्॥९॥

मृद्वीका रसिता सिता समशिता स्फीतं निपीतं पयः,
स्वर्यातेन सुधाऽप्यधायि, कतिधा रम्भाफलं खण्डितम्।
सत्यं ब्रूहि मदीय जीव! भवता भूयो भवे भ्राम्यता,
कृष्णेत्यक्षरयोरयं मधुरिमोद्गारः क्वचिल्लक्षितः॥१०॥

—जगन्नाथपण्डितस्य।

२३—बोधिसत्त्वस्याऽनुकम्पा

भगवान् बोधिसत्त्वः स्वधर्माऽभिरते ब्राह्मणकुले जन्मपरिग्रहं चकार। स कुलजातकर्मादिसंस्कारो मेधावित्वात् ज्ञानकौतुकाच्च चिरेणैव कालेन सकलविद्यापारं निस्तीर्णः सर्वासु कलासु च निष्णातः आचार्यपदवीमवाप। स कामेषु बहुदोषजातं दृष्ट्वा वानप्रस्थो बभूव। तस्य प्रशमेन व्यालव्याघ्रादयो निवृत्तपरस्परद्रोहा तपस्विवद् विचेरुः।

अतोऽयमश्वः कपिलाऽनुकारिणा,
पितुस्त्वदीयस्य मयापहारितः।
अलं प्रयत्नेन तवात्र मा निधाः,
पदं पदव्यां सगरस्य संततेः॥१

ततः प्रहस्यापभयः पुरन्दरं,
पुनर्बभाषे तुरगस्य रक्षिता।
गृहाण शस्त्रं यदि सर्ग एष ते,
न खल्वनिर्जित्य रघुं कृतीभवान्॥११

स एवमुक्त्वा मघवन्तमुन्मुखः,
करिष्यमाणः सशरं शरासनम्।
अतिष्ठदालीढविशेषशोभिना,
वपुःप्रकर्षेण विडम्बितेश्वरः॥१२

रघोरवष्टम्भमयेन पत्रिणा,
हृदि क्षतो गोत्रभिदप्यमर्षणः।
नवाम्बुदानीकमुहूर्तलाञ्छने,
धनुष्यमोघं समधत्त सायकम्॥१३

दिलीपसूनोः सबृहद् भुजान्तरं,
प्रविश्य भीमासुरशोणितोचितः।
पपावनास्वादितपूर्वमाशुगः,
कुतूहलेनेव मनुष्यशोणितम्॥१४

हरेः कुमारोऽपि कुमारविक्रमः,
सुरद्विपास्फालनकर्कशाङ्गुलौ ।
भुजे शचीपत्रविशेषकाङ्किते,
स्वनामचिह्नं निचखान सायकम् ॥१५॥

जहार चान्येन मयूरपत्रिणा,
शरेण शक्रस्य महाशनिध्वजम् ।
चुकोप तस्मै स भृशं सुरश्रियः,
प्रसह्य केशव्यपरोपणादिव ॥१६॥

तयोरुपान्तस्थितसिद्धसैनिकं,
गरुत्मदाशीविषभीमदर्शनैः ।
बभूव युद्धं तुमुलं जयैषिणो,–
रधोमुखैरूर्ध्वमुखैश्च पत्रिभिः ॥१७॥

ततः प्रकोष्ठे हरिचन्दनाङ्किते
प्रमथ्यमानार्णवधीरनादिनीम् ।
रघुः शशाङ्कार्धमुखेन पत्रिणा,
शरासनज्यामलुनाद् बिडौजसः ॥१८॥

स चापमुत्सृज्य विवृद्धमत्सरः,
प्रणाशनाय प्रबलस्य विद्विषः ।
महीध्रपक्षव्यपरोपणोचितं,
स्फुरत्प्रभामण्डलमस्त्रमाददे ॥१९॥

भोजे शासनि लोहताम्राभावे दूर्वाबाहुल्ये च को हेतुः। प्रथम विप्रः पठति—

अस्य श्रीभोजराजस्य, द्वयमेव सुदुर्लभम्।
शत्रूणां शृङ्खलैर्लोहं, ताम्रं शासनपत्रकैः॥ ५॥

सा जाह्नवीतीरवासिनी विदुषी राजानं 'जीवतु चिरं श्रीभोज' इति ब्रुवन्ती श्लोकं पपाठ—

भोजप्रतापाग्निरपूर्व एष,
जागर्ति भूभृत्कटक-स्थलीषु।
यस्मिन् प्रविष्टे रिपुपार्थिवानां,
दूर्वाः प्ररोहन्ति गृहाङ्गणेषु॥ ६॥

राजा पद्यद्वयं श्रुत्वा अतीव तुतोष पुरस्कारार्थं तयोः कांचि-दधिकारिणं प्रेषयामास। पुनश्च तुरङ्गं त्वरयन् प्रासादोद्यानाभिमुख-मागमत्। ततस्तुरङ्गमात् क्रीडापर्यन्तस्थः प्रथमायाः चन्द्र-मण्डलं दृष्ट्वा तदन्तःस्थकलङ्कं वर्णयामास—

अङ्कं केऽपि शशङ्किरे जलनिधेः पङ्कं परे मेनिरे,
सारङ्गं कतिचिच्च संजगदिरे भूच्छायमैच्छन्परे।

इति राजा पूर्वार्धं लिखित्वा कालिदासकवये प्रेषयामास। स च श्लोकस्यास्य उत्तरार्धं लिलेख स कविः—

इन्दौ यद्दलितेन्द्रनील-शकल-श्यामं दरीदृश्यते,
तत्सान्द्रं निशि पीतमन्धतमसं कुक्षिस्थमाचक्ष्महे॥ ७॥

—भोजप्रबन्धः।

२८—वैशम्पायनः

अथ मुहूर्तादिव वैशम्पायनः शुकः प्रतीहार्या गृहीतपञ्जरः नातिविकलावलम्बिना सितकञ्चुकावच्छन्नवपुषा जराधवलितमौलिना कञ्चुकिनाऽनुगम्यमानो राजान्तिकमाजगाम। क्षितितलनिहितकरतलः कञ्चुकी राजानं व्यज्ञापयत्—देव! देव्यो विज्ञापयन्ति—'देवादेशादेष वैशम्पायनः स्नातः कृताहारश्च देवपादमूलं प्रतीहार्याऽऽनीतः' इत्यभिधाय गते तस्मिन्राजा वैशम्पायनमपृच्छत्—कच्चिदभिमतमास्वादितं भवताऽभ्यन्तरे किंचिदशनजातम्? स प्रत्युवाच—देव! किं वा नास्वादितम्? ... कषायमधुरः प्रकाराममापीतो जम्बूरसः। हरितानि ... दाडिमीबीजानि। दलितानि च द्राक्षाफलस्वादूनि प्राचीनामलकीफलानि। किं वा बहुप्रलपितेन? सर्वमेव देवीभिः स्वयं करतलोपनीयमानममृतायते। इत्येवं वादिना वचनमाक्षिप्य नरपतिरब्रवीत्। आस्तां तावत्सर्वमेवेदम्। अपनयतु नः कुतूहलम्।

आवेदयतु भवानादितः प्रभृति कार्त्स्न्येनात्मनो जन्मवृत्तान्तम्। कस्मिन्देशे भवान् जनितः। कथं वा जातः। केन वा नाम कृतम्। का माता। कश्च ते पिता। कथं वेदानामागमः। कथं शास्त्राणां परिचयः। कुतः कलाः समासादिताः। किं जन्मान्तरानुस्मरणम् उत वरप्रदानम्। अथवा विहङ्गवेषधारी कश्चित्प्रच्छन्नं वससि। क्व वा पूर्वमुषितम्। कियद्वा वयः। कथं पञ्जरबन्धः। कथं चण्डालहस्तगमनम्। इह वा कथमागमनम्। वैशम्पायनस्तु स्वयमुपजातकुतूहलेन सबहुमानमवनिपतिना पृष्टो मुहूर्तमिव ध्यात्वा सादरमुवाच—देव! कथिता ... राजानमुद्दिश्य आर्यामिमां पपाठ—

स्तनयुगमश्रुस्नातं, समीपतरवर्तिहृदयशोकाग्नेः।
चरति विमुक्ताहारं, व्रतमिव भवतो रिपुस्त्रीणाम् ॥१॥

—कादम्बरी।

२६—चन्द्रोदयवर्णनम्

चन्द्रोऽपि साचिव्यमिवास्य कुर्वन्, तारागणैर्मध्यगतो विराजन्
ज्योत्स्नावितानेन वितत्य लोकान्, उत्तिष्ठतेऽनेकसहस्ररश्मिः।
शङ्खप्रभाक्षीरमृणालवर्णं, उद्गच्छमानं व्यवभासमानम्।
ददर्श चन्द्रं स कपिप्रवीरः, पोप्लूयमानं सरसीव हंसम् ॥२
ततः स मध्यंगतमंशुमन्तं, ज्योत्स्नावितानं मुहुरुद्वमन्तम्।
ददर्श धीमान्भुवि भानुमन्तं, गोष्ठे वृषं मत्तमिव भ्रमन्तम्।
लोकस्य पापानि विनाशयन्तं, महोदधिं चापि समेधयन्तम्
भूतानि सर्वाणि विराजयन्तं, ददर्श शीतांशुमथाभियान्तम्
या भाति लक्ष्मीर्भुवि मन्दरस्था, यथा प्रदोषेषु च सागरस्था।
तथैव तोयेषु च पुष्करस्था, रराज सा चारु निशाकरस्था ॥३
हंसो यथा राजतपञ्जरस्थः, सिंहो यथा मन्दरकन्दरस्थः।
वीरो यथा गर्वितकुञ्जरस्थः, चन्द्रोऽपि बभ्राज तथाऽम्बरस्थः
स्थितः ककुद्मानिव तीक्ष्णशृङ्गो, महाचलः श्वेत इवोर्ध्वशृङ्गः
हस्तीव जाम्बूनदबद्धशृङ्गो, विभाति चन्द्रः परिपूर्णशृङ्गः ॥४
विनष्टशीतांशुतुषारपङ्को, महाग्रहग्राहविनष्टपङ्कः।
प्रकाशलक्ष्म्याश्रयनिर्मलाङ्को, रराज चन्द्रो भगवाञ्छशाङ्कः।
प्रकाशचन्द्रोदयनष्टदोषः, प्रवृद्धरक्षः पिशिताशदोषः।
रामाभिरामेरितचित्तदोषः, स्वर्गप्रकाशो भगवान् प्रदोषः ॥५
[illegible] प्राप्य यथा मृगेन्द्रः, महारणं प्राप्य यथा गजेन्द्रः
[illegible] यथा नरेन्द्रः, तथा प्रकाशो विरराज चन्द्रः ॥६

३०—भारतमहिमा

अहो अमीषां किमकारि शोभनं
प्रसन्न एषां स्विदुत स्वयं हरिः ।
यैर्जन्म लब्धं नृषु भारताजिरे,
मुकुन्द सेवौपयिकं स्पृहा हि नः ॥ १ ॥

कल्पायुषां स्थानजयात् पुनर्भवात्,
क्षणायुषां भारतभूजयो वरम् ।
क्षणेन मर्त्येन कृतं मनस्विनः,
संन्यस्य संयान्त्यभयं पदं हरेः ॥ २ ॥

अहो भुवः सप्तसमुद्रवत्या,
द्वीपेषु वर्षेष्वधिपुण्यमेतत् ।
गायन्ति यत्रत्यजना मुरारेः
कर्माणि भद्राण्यवतारवन्ति ॥ ३ ॥

विष्णुपुराणेऽपि कथन—

गायन्ति देवाः किल गीतकानि
धन्यास्तु ते भारतभूमिभागे
स्वर्गापवर्गास्पदहेतुभूते,
भवन्ति भूयः पुरुषाः सुरत्वात् ॥ ४ ॥
कर्माण्यसंकल्पिततत्फलानि,
संन्यस्य विष्णौ परमात्मभूते ।

२६—चन्द्रोदयवर्णनम

चन्द्रोऽपि साचिव्यमिवास्य कुर्वन्, तारागणैर्मध्यगतो विराजन्।
ज्योत्स्नावितानेन वितत्य लोकान्, उत्तिष्ठतेऽनेकसहस्ररश्मिः ॥१॥
शङ्खप्रभाक्षीरमृणालवर्णं, उद्गच्छमानं व्यवभासमानम्।
ददर्श चन्द्रं स कपिप्रवीरः, पोप्लूयमानं सरसीव हंसम् ॥२॥
ततः स मध्यंगतमंशुमन्तं, ज्योत्स्नावितानं मुहुरुद्वमन्तम्।
ददर्श धीमान्भुवि भानुमन्तं, गोष्ठे वृषं मत्तमिव भ्रमन्तम् ॥३॥
लोकस्य पापानि विनाशयन्तं, महोदधिं चापि समेधयन्तम्।
भूतानि सर्वाणि विराजयन्तं, ददर्श शीतांशुमथाभियान्तम् ॥४॥
या भाति लक्ष्मीर्भुवि मन्दरस्था, यथा प्रदोषेषु च सागरस्था।
तथैव तोयेषु च पुष्करस्था, रराज सा चारुनिशाकरस्था ॥५॥
हंसो यथा राजतपञ्जरस्थः, सिंहो यथा मन्दरकन्दरस्थः।
वीरो यथा गर्वितकुञ्जरस्थः, चन्द्रोऽपि बभ्राज तथाम्बरस्थः ॥६॥
स्थितः ककुद्मानिव तीक्ष्णशृङ्गो, महाचलः श्वेत इवोर्ध्वशृङ्गः।
हस्तीव जाम्बूनदबद्धशृङ्गो, विभाति चन्द्रः परिपूर्णशृङ्गः ॥७॥
विनष्टशीतांशुतुषारपङ्को, महाग्रहग्राहविनष्टपङ्कः।
प्रकाशलक्ष्म्याश्रयनिर्मलाङ्को, रराज चन्द्रो भगवान्शशाङ्कः ॥८॥
प्रकाशचन्द्रोदयनष्टदोषः, प्रवृद्धरक्षः पिशिताशदोषः।
रामाभिरामेरितचित्तदोषः, स्वर्गप्रकाशो भगवान् प्रदोषः ॥९॥
शिलातलं प्राप्य यथा मृगेन्द्रः, महारणं प्राप्य यथा गजेन्द्रः।
राज्यं समासाद्य यथा नरेन्द्रः, तथा प्रकाशो विरराज चन्द्रः ॥१०॥

३०—भारतमहिमा

अहो अमीषां किमकारि शोभनं
प्रसन्न एषां स्विदुत स्वयं हरिः ।
यैर्जन्म लब्धं नृषु भारताजिरे,
मुकुन्द सेवौपयिकं स्पृहा हि नः ॥ १ ॥

कल्पायुषां स्थानजयात् पुनर्भवात्,
क्षणायुषां भारतभूजयो वरम् ।
क्षणेन मर्त्येन कृता मनस्विनः,
संन्यस्य संयान्त्यभयं पदं हरेः ॥ २ ॥

अहो भुवः सप्तसमुद्रवत्या,
द्वीपेषु वर्षेष्वधिपुण्यमेतत् ।
गायन्ति यत्रत्यजना मुरारेः,
कर्माणि भद्राण्यवतारवन्ति ॥ ३ ॥

विष्णुपुराणेऽपि वर्ण्यते—

गायन्ति देवाः किल गीतकानि,
धन्यास्तु ते भारतभूमिभागे ।
स्वर्गापवर्गास्पदहेतुभूते,
भवन्ति भूयः पुरुषाः सुरत्वात् ॥ ४ ॥
कर्माण्यसंकल्पिततत्फलानि,
संन्यस्य विष्णौ परमात्मरूपे ।

अवाप्य तां भारतकर्मभूमिं,
तस्मिल्लयं ये त्वमलाः प्रयान्ति ॥ ५ ॥

जानामि नैतत्क्व वयं विलीने,
स्वर्गप्रदे कर्मणि देहबन्धम् ।
प्राप्स्याम धन्याः खलु ते मनुष्या,
ये भारते नेन्द्रियविप्रहीनाः ॥ ६ ॥

नमो महद्भ्योऽस्तु नमः शिशुभ्यो,
नमो युवभ्यो नम आवटुभ्यः ।
ये भारतीया विविधाभिधेया,-
श्चरन्ति तेभ्यः शिवमस्तु राज्ञाम् ॥ ७ ॥

३१—द्वा सुपर्णा

किमपि बन्धनमेत्य विहङ्गम,-
श्चिरमुवास हिरण्मयपञ्जरे ।
विधिवशादितरत्नमुपेयिवान्,
स्फुटमदोऽलपदर्भगमम्यपा ॥ १ ॥

अयि ! जहीहि हिरण्मयपञ्जरं,
सख उपेहि निजाश्र पुनर्वनम् ।

ननु वने सुमहद् व्यगनं भवेत्,
तदिह हन्त ! वनाय निगडलम् ॥ २ ॥

न हि न हि स्वदते ममतं वचः,
सुगहनं किल शृङ्खलबन्धनम् ।
किमहमद्य करोमि वदस्व भोः,
कथमिवास्मि वदिर्भविता वने ॥ ३ ॥

यदिरवम्बित एव निजेच्छया,
वनविहंग उदारमसौ जगौ ।
वच उवाच परोऽप्युपदेशितं,
समवदन् न किमप्युभयोर्गिरः ॥ ४ ॥

किमनया कनककम्पभनिन् ! त्वया,
सवगुपामतिमानुषया गिरा ।
स्वमहिमातिविमोहित ! शिक्षितां,
इयमपूर्वतरा नरभारती ॥ ५ ॥

न खलु किं करवाणि तथाऽर्थये,
न हि परैरुपदेशितवाङ्मयम् ।
कथमहो बत ! संप्रति गीयतां,
मुनिगणविस्मृतकानकगीतिका ॥ ६ ॥

अयि ! विलोकय नीलनभस्तलं,
किमपि नावरणं न च बन्धनं ।

३३—सूक्तयः

विलोक्य नभोङ्गणात्मकलतारिकायूथिका,
पलायनपरा विलोचनपथान्मुदूरंगता ।
प्रयाचति निशामृगी किमिति मानुषागान् रवि,-
मंहिरवरकान्तरं गतु विभामयंस्तेजसा ॥ १ ॥

इतोऽपि गुरुध्वनि श्रुतिपथं गतो मे नराः,
इतो वहिरियं प्रियाशिञ्जनिमीलितेयं च का ।
परिसरमनारं समपि मन्दिरं गतेरः,
गमैन्य चिरतामृतं मिलति नैव पांशो मुहुः ॥ २ ॥

प्रशान्तमपि जगद्वनं किमपि कोऽपि नादोऽपि
मदानुगमया श्रिया [illegible] ।
गृहाण कम्प्रागतां [illegible] प्रियः,
[illegible] न कुरु [illegible] ॥

अनन्तकुसुमप्रभा [illegible] श्रीमतां,
[illegible] ।
[illegible] कथा [illegible],
[illegible] ॥ ४

[illegible]
[illegible] ।

न वा दिवसरात्रिपर्वसमयोऽप्यदर्शयो विराट्,
किमस्ति सरि तेऽथवा मम रहस्यमाम्यन्तरम् ॥५॥
त्वयैव रचितो जनो मलिनभूमिकाधारकः,
त्वयैव सह नन्दनेन भुजगो महाविर्मितः ।
यदस्ति मलिनं मुखं विविधपातकान्मानवं,
तदस्ति तव दूषणं तव गृहाण देहि क्षमाम् ॥ ६ ॥

नवरत्न-परिडतस्य गिरिधरशर्मणः ।

६४—तत्वावबोधः

या शक्तिर्दुःखदावानलशमनविधौ वारिधारेव मेयात्,
याऽप्यात्मज्ञानसिद्ध्यर्थं मुनिवरनिवहैराश्रिता युक्तचित्तैः ।
यस्या नामैव पूतं प्रदहति दुरितं जन्मजन्मार्जितं वै,
तां श्रीकृष्णस्य भक्तिं भवतरणमतिः सम्प्रपन्नोऽस्मि नित्यम् ॥१॥
जानीमो न कुतः किमर्थमिति या सृष्टिर्विचित्रेह या,
भ्रान्ताः शास्त्रशतैस्तथापि नियतं नित्यं चरामो मुधा ।
संदेहैः शतधा विदीर्णहृदया मग्नास्तथाऽऽशार्णवे,
नित्यानित्यविवेकशून्यमनसो बाला इवाशा वयम् ॥२॥
दर्पेणाथ वियद्वितानविपुले नोच्छ्रापिता दर्पिताः,
पश्यामो जगदेतदेकमखिलं स्थानं सुरानां महद् ।
यावन्मोदभरेण मत्तमनसस्तावत्तथाल्हादिताः,
उल्कापातसमाः पतन्ति विपदोऽचिन्त्यानपेक्षाः पराः ।३॥

विन्दं बाष्पपूरिते च लोचने विलोक्य चिन्तातुरा समीपं स्थित्वा चिन्ताकारणमपृच्छन्। सोऽपि सर्वं वृत्तं तस्यै न्यवबेदयन्। तन्निशम्य खिन्ना देवी धैर्यमवलम्ब्य जगाद—नाथ! यद्यपि वयमबलाः अस्माभिश्च राजनीतौ न वक्तव्यं किमपि तथापि विषयेऽत्र किंचिद्वक्तुमिच्छामि। यदि योग्यं तदा माह्यम्। यद्यपि श्वशुरचरणा महत्यामापदि मग्नाः कदाचिन् कुपितो विजापुराधीशस्तान् प्राणैरपि वियोजयिष्यति। तथाप्यस्मद् भयाद् युष्माभिः स्वराज्यस्थापनोद्यमान्न विरमणीयम्। प्रतिवर्षं प्रतिदिनं वा समग्रे भारते वर्षे जायमानानां गोहत्यानां पवित्रताशीलहरणानां विप्रधर्मनाशानामपेक्षयाऽस्माकं वा श्वशुरचरणानां वा प्राणाः क्षुद्रा एव परिवर्तिनि संसारे प्राणिनां जीवनं क्षणमङ्गुरमेव। तद्यदि पूज्यश्वशुरचरणानां प्राणव्ययेन सर्वेषां भारतीयानां प्राणा रक्ष्यन्ते तदा गच्छन्तु ते प्राणाः लभन्तां च दुर्लभं चिरन्तनं यशो मदीयश्वशुरपादाः।

इत्थं शिवराजः स्वमनोरथानुरूपं स्वपत्न्या भाषणं निशम्य सुखेन सुप्तः। प्रभाते मातरमभिवाद्य सर्वं वृत्तं निवेद्य कर्तव्यं पप्रच्छ। सापि वीरपत्नी तथैव स्वानुकूलाभिप्रायं जगाद। तदनन्तरं शिवराजो मातृभूमेर्गोब्राह्मणादीनां भाविनः आर्यसन्तानस्य च शुभाकांक्षी भवेयमिति निश्चित्य स्वराज्योत्थानस्थापनोद्यमान्न विरराम।

कथमन्यथा श्रीशिवराजस्य यशः शाश्वतमिह लोकेऽभविष्यत्। अस्मिन् जननमरणक्रमवति संसारे को वा न मृतो न वा जातः। यशस्तु तस्यैव भवति यो न्याय्यं समाचरति। यो विधूय मित्ररुलत्रणां मोहं समाजहिताय देशोद्धरणाय यतते। यश्च धर्मिको परिपालयति।

—श्रीपादशास्त्रिप्रणीतात् शिवराजचरितात्।

white and fair in all her limbs. सरस्वती—शारदा = Muse.

Verse 4. पद्मैः अर्चितं = worshipped by lotuses. पद्मया - सीतया । Seeta is the incarnation of Laskhmi. पद्मात्जाता पद्मा । तेन विनुतं = Praised by the lotus born. सुखैकनिलयं—Sole source of happiness. निर्गता क्रिया यस्मात्—निर्विकारं = Steady; without changes. शाश्वत् शं करोतीति—Bringing permanent. welfare. नमामि = I pray sincerely. तयोः शरणं—to secure the resort of those feet of Ramachandra.

Verse 5. फुल्लस्य इन्दीवरस्य कान्तिरिव कान्तिर्यस्य । whose lustre is just like the full blown blue lotus. बर्हस्य अवतंसः प्रियो यस्य = who is fond of peacock's feathers as (head) ornament. श्रीवत्स = a curl of hair on the breast of Vishnu. नयने एव उत्पले ताभ्यां । अर्चिता तनुर्यस्य । whose body is reflected by the blue eye-lotuses. कलवेणु = Melodious flute or pipe. दिव्या चन्दनस्य चर्चा यस्य = who has the celestial paste of sandal.

Verse 6. This is from कुन्दमाला—a drama by Dingnagacharya contemporary of Kalidas 5th Cent. A D. ऊर्ध्वं विसर्पति = Rising upwards. अन्तर्गतं यत् तपः, तस्य तेजः—of the fire of austerity practised within the heart. वल्मीकः—जटा are likened to the ant-hill in which the Gangetic waves are compared to serpents. सततानपायिनी = Ever lasting. constant. नवस्य अरुणस्य अंशुवत् कपिशा = Brown like the twilight colour of the rising sun. Jatas

of Shankar are red *cf.* नीललोहित—कण्ठे नीलो जटासु लोहितः।

Verse 7. कल्याणानां महसां भाजनं = Possessor of auspicious lustre or splendour. धुर्यं best, chief, दलितजदि = remove; destroy.

Verse 8. आवसते = Dat Sing. Coming in contact with. The moon comes near the orbit of the sun on अमावस्या when दर्शश्राद्ध is performed "दर्शः सूर्येन्दुसंगमः।" अमर०। तर्पयते Dat Sing. satisfying. It is believed that the digits of the moon are enjoyed by gods and manes in कृष्णपक्ष मूर्छता=Spreading. चूडा = Forehead.

Verse 9. The praise of the Almighty assuming various phases; Universal form *cf.* एकं सन्तं बहुधा-वदन्ति, अग्निं यमं मातरिश्वानमाहुः। शशाङ्क = Moon. भूयः often.

2. The Talent is all-powerful.

This extract illustrates the peculiar features of the Panchatantra *i. e* story in a story with absorbing interest (2) Story in prose and instructive aphorisms in verses. (3) Fables containing salutary moral teaching.

दंपती = Couple; husband and wife. Always dual number. प्रत्यास० = when delivery time was very near. वृद्धिकर = Prosperous; prospective. सापाय = dangerous. वेला = Coast, shore. प्लावन = Flood, inundation. कृच्छ्रे—संकटे = In adversity. अनावृष्टिः = Draught, scarcity of water. आहारवै० = want of

white and fair in all her limbs. सरस्वती—शारदा = Muse.

Verse 4. पद्मैः अर्चितं = worshipped by lotuses. पद्मया—सीतया। Seeta is the incarnation of Laskhmi. पद्माज्जातो ब्रह्मा। तेन विनुतं = Praised by the lotus born. सुखैकनिलयं—Sole source of happiness. निर्गता क्रिया यस्मात्—निर्विकारं = Steady; without changes. शश्वत् शं करोतीति—Bringing permanent welfare. सन्नौमि = I pray sincerely. तयोः लब्धये—to secure the resort of those feet of Ramachandra.

Verse 5. फुल्लस्य इन्दीवरस्य कान्तिरिव कान्तिर्यस्य। whose lustre is just like the full blown blue lotus. बर्हस्य अवतंसः प्रियो यस्य = who is fond of peacock's feathers as (head) ornanment. श्रीवत्स = a curl of hair on the breast of Vishnu. नयने एव उत्पले ताभ्यां। अर्चिता तनुर्यस्य। whose body is reflected by the blue eye-lotuses. कलवेणु = Melodious flute or pipe. दिव्या अङ्गस्य भूषा यस्य = who has the celestial paste of sandal.

Verse 6. This is from कुन्दमाला—a drama by Dingnagacharya contemporary of Kalidas 5th Cent. A D. ऊर्ध्वं विसर्पतीति = Rising upwards. अन्तःकरणे यत् तपः, तस्य तेजः—of the fire of austerity practised within the heart. वल्मीक०—जटा are likened to the ant-hill in which the Gangetic waves are compared to serpents. सदास्थायिनी = Ever lasting; constant. तरुणस्य अरुणस्य अंशुवत् कपिशा = Brown like the twilight colour of the rising sun Jatas

gives the ideal rules of Aryan Culture.

अद्वेष० = who are not affected by hatred and passion. हृदयेनाभ्यनु० = appealing to heart. पारम्पर्यक्रमा० = Handed down from generation to generation. अन्तरालैः सङ्कीर्णैः = with mixed tribes, subdivisions of castes. हीनः आचारो यस्य सः = man of mis-conduct. धर्मात्मा = one who deviates from right path. प्रेत्य = After death. पूजा = Honour. ईप्सित = desired. कृष्णवर्त्मा—अग्निः = Fire. अनुशासनं = Instruction; teaching. श्लक्ष्णा = Gentle, soothing. जनैर्वादः = Useless quarrel with public. परीवादो निन्दा = scandal, censure. उपघातः = Insult. विविक्तः = Private, lonely. ग्रामः = Group; collection. अमेध्य Impure, dirty. तृणानि—दर्भास्तरं । नोच्छिद्यन्ते = are never absent. अवरज = Younger brother. रमेत्—रमेत । पिधातव्यौ = should be covered or shut up. नोदके० = one should not see his reflection in water. न + आहूतः = अनाहूतः = not invited. सदः = Assembly; house. मृद्नीयात् = should pulverise; break into pieces. नखः = nail. अद्वारेण = Passage which is not regular door. आवृतं = Compound; yard. संहतपाणिभ्यां = with two hand joined together. वक्र् अनृजुः—Crooked; curved. ब्राह्ममुहूर्ते—रात्रेश्च पश्चिमो यामो मुहूर्तो ब्राह्म उच्यते = 4 A. M. आवश्यकं = morning physical duties. कृतशौच = with clean body and mind. शौचं = Evacuation of excrement. प्रसाधनं = Toilet. पूर्वाह्ण = Forenoon. पाणिपादचपलः = one who moves his hands, feet, eyes, tongue, unnecessarily. वर-

द्रोहकर्मधीः = one who acts and thinks ill of others. दृढव्रती = of resolute purpose; persevere. शान्तो जितेन्द्रियः अहिंस्रः = of harmless behaviour ; innocent. विप्रकृतः = abused. विपर्ययः = Destruction , ruin. हिंस्यते = Is injured.

4. The story of a miser.

This story is taken from Purush parikhsa, a book written by Vidyapati, patronised by the King Shiva Singh of the middle age. The book contains stories showing the qualities of an ideal man and rediculing the defects in a man.

*अश्नाति = Enjoys. सञ्चीकृतं वित्तं येन सः = Collect*ed; amassed. चिरसञ्चयः । अनागतावेक्षा = care for the future; provident thought ; attention to the future. परैः अलक्ष्यं स्थानम् = Secret place not detected by others. परामृश्य = having considered. निराकुलं = without hesitation. द्रविणं = wealth. कदर्यः = a miser. पोटलकं = bag. दातुं इच्छा दित्सा = desire to give. मितं पचतीति मितंपचः कृपणः । दुर्विपाकः = Ill consequence ; bad result.

5. The Ideal Man.

The extract is from Valmiki's Ramayan, the foremost Mahakavya in Sanskrit literature. The extract describes the rare and exemplary qualities of Rama, the hero of the Ramayan. The ideal virtues and admirable conduct are set forth in this lesson.

चारित्रम् = Good character. आत्मवान् = Self-res-

I did not even look at. Even the sight of a dog is considered pulluting the oblations. *cf.* कुक्कुटः पक्षपातेन श्वा दृष्ट्वाऽन्नं प्रदूषयेत् म० मा० । न अपकरोतीति अनपकारी = without any fault; innocent. अदृष्टं—अतर्कितं = unforeseen. भयं = Danger. संभ्रान्तः = awfully frightened. विषण्णः = Gloomy. हास्तिनपुरं = The ancient capital of India, first founded by King Hastina of Bharata race, was situated 56 miles north-west of the modern Delhi. पापकृत्यां = The devil of curse; the effect of sinful acts. शमयेत् = might remove the evil influence of, subside the wrath

मृगया = out for a hunt अभिरतः = rigidly practising. पुरोहितस्य धर्मः पौरोहित्यं = Duty or office of family priest. स्वाध्यायमं० = Regular Vedic scholar. संभृतः = *Inheriting; possessing the influence of.* अन्तरेण = Excepting. कृत्या = A female deity to whom oblations are made for destructive purposes. उपांशुव्रतं = a secret vow, a sacred resolution unknown to others. उपादाय = Taking in his company. उपावृत्तः = Returned to his capital. वृतः = chosen; selected. अविचारयद्भिः = unhesitatingly; readily. तक्षशिलां = name of a city in the north, was famous for the seat of learning. स्वस्य ओजसा = by his personal strength and vigour. वशे स्थाप० = Subjugated; annexed.

7. Budha's Indifference to worldly objects.

These verses are from Budha-charit a Maha-

Instantly sank down in grief. कूबराग्रं = the wooden frame of the chariot. निह्राद्वता=deeply resounding. नियतं = certain; inevitable. निष्ठा = End; destruction. स्वस्थाः = Self-composed. आर्तिकाले = At the time of calamity. सचेतनः = a rational being. प्रमत्तः = careless.

8. The Capture of Hanuman.

This piece is taken from the 3rd Act of Abhisheka, drama written by Bhasa Mahakavi, who is esteemed by Kalidas and Banabhatta. The heroic deeds of Hanuman and the dialogues between him, Bibhishana and Ravan are very interesting, written in elegant Sanskrit.

कांचनमयैस्तोरणैः महितं द्वारं = The door with arches and pillars made of gold. अशून्यं—मनाय = Present. सम्भ्रमः = Hot haste, confusion. अतिपाति = which does not brook delay. वनाभिमर्दात् = by the destruction of Ashoka garden. परिधर्षित = Insulted. न विदितं आगमनं यस्य = whose arrival is not known. संरम्भं = Impetuously angrily. अविमृदिता = Shattered. मावज्ञं = Disdainfully. मृणालं = lotus stalk. दारुपर्वतकः क्रीडार्थं निर्मितः काष्ठमयः स्वल्पः पर्वतः = a small artificial wooden hill for sport. विसंज्ञीकृता = Rendered senseless; stunned. बल=forces, army. द्रुमैर्युध्यतेऽस्मै=Fighting with tress hurled against. प्लवंगमः = Monkey. अनन्तरीयं = Immediately. न समाज्ञप्ताः = Though not ordered. अभिद्रुतान् (वानरमिति शेषः) = Assaulting the monkey. कांचनपरिघं = Golden bar used for

shuting the gate उद्यम्य = Raising, lifting up हरि Monkey. यमन्त = Shooting sending forth लङ्घयित्व = Attacking, jumping up जघान=killed कापर्दिक= Insignificant wretch of a monkey वन ओका यस्य स = Dweller of a forest तुमुल = tumultous नैऋतन = by the demon. दिदृक्षया = with desire to behold औरस: उरस: उत्पन्न = legitimate अवध्य = ... to be killed वचनीय = Censurable blamable प्रदीप्त = Inflamed

9 The Episode of Trishanku

Part I

This account is from the Balkanda of the Ramayana. The story illustrates that a person, longing to acquire a position which is impossible and improper, falls flat and is totally ruined

मनस्वी = High minded a man of resolute purpose शरण्य = kind to the helpless प्रत्याख्यात = Rejected, यष्टुं कामो यस्य स = Desirous of performing sacrifice. दुष्टा मेधा यस्य मेधा becomes मेधस at the end of बहुव्रीहि Stupid परमार्थत: = Highest goal, बालिश: = Block head, foolish पर्याकुलं = Excited ध्वस्तमूर्धज = with the hair fallen off. चिन्त ... long ... [illegible]

Not attaining विपर्यय: = Reverse; calamity ... वृत्त = Noble character and good conduct.

—पराक्रमः = Manliness. प्रसादः = Favour. निवर्तयितुः = to avert ; to set at naught.

Part II.

मा भैषीः = The temporal अ is dropped before माङ् = Do not fear. आमन्त्र्य = to invite. संभार—सामग्री = essentials ; requisites. वदान्यः = charitable; liberal in donating gifts. जेतुमिच्छा = Desire to conquer. ओजसा—पराक्रमेण । तपोबलेन । दुष्प्रापं = Difficult to reach. पाकशासनः = Indra. अवाक् शिराः = Topsy Turvy ; with head turned downwards. वैश्वानरपथः = *The solar region.* ज्योतिः = *Luminary ; star.* कृतार्थः = Satisfied ; contented. उज्ज्वलं = Bright.

11. Story of Uttanka.

This story from the Mahabbarta teaches that Good luck comes to those who devoutly serve God and Guru and that (2) Impurity is an hindrance to attain divinity.

अपोदस्य पुत्रः आपोदः । शुश्रूषा = Service. यास्यकार्यं = Sacrificial purpose. नियोगः = Order. उपलभ्य—ज्ञात्वा । अनुजाने = I bless, I promise. अभीष्ट = Desired object. अनृणः = Free from debt or obligations. सिन्न = Put on; worn. ऋषभ = Bull. अतिप्रमाणं = of great stature and bulk. उपस्पृश्य—आचम्य = Having sipped water. अर्थी = with a request. सन्निहिता = Present. उच्छिष्ट = who has not washed his hands and mouth after meals. प्राङ् मुखः = Facing the East. अद्भिः = Inst. plu. of अप् Fem = water. त्रिः स्पृश्य परिमृज्य = thrice washed his mouth, eyes, ears &c.

भाव: = Good motive. अवमुच्य = Taking out of ears सुभृशं = eagerly. अप्रमत्त: = with great care. क्षपणक = a Jain saint. संन्यस्य = स्थापयित्वा। खलान = dug out भेयस्वान् = Lucky ; fortunate.

12. The description of the Autumn.

पद्मस्य पलाशोवत् अदितिग्रो यस्या:। निर्वर्तयित्वा-सपाप = Accomplished. सस्यानि = crops ; harvest. कृत कर्म ये न स: = who has done his duty. शैलोपरि द्रुमाणां पुरो गच्छन्ति = hovering above the trees on the hills मातङ्ग = Elephant. पयसां धरा: = Clouds. वारण: = elephant. प्रस्रवण: = Streams, cataracts. अभिहृता = washed off (by torrents). सानु = Summit. अनुलिप्त: = Besmeared ; covered. रश्मि: = Ray , beam.

Verse 7. Shows that the autumn has spread its beauty into three objects is seen divided into branches, light, movements etc.

अग्रहस्ता: = The first beam of the rising sun. पद्माकरेषु = in the beds of lotuses. शरत्काल: = is the subject in verse 9th understood विनयन् = removing or increasing the pride. (दर्पं) अभ्यागत: = who have joined ; associated. स्मर: = love or passion. पद्मरजो = laden with the pollen of the lotuses. मदप्लुत: = bedewed with rut. दर्पित = haughty ; furious. निम्नगाच्छवि—नदी = River. विभक्त = Distributed ; spread. मनोज्ञ = Fragrant , scented प्रियक = Priyangu tree. घनतर = Big ; bulky. सुवर्णवर्णाभ: = as shining as gold. ज्योतिष्मन्ति = shining ; looking brighter. वनस्पत्यन्तराणि = the interior parts of

used in cleansing ornaments मितंपचा = cooking a little quantity. शराव = an earthen platter. खादिरं = prepared out of Khadir wood. ककुभो॰ = mortor of the Arjuna tree अद्भिरसकृत् = frequently by water. क्वथन॰ = heated to the boiling point and five times in quantity. दत्तचुल्ली॰ = it is still customary for [illegible] to throw [illegible] grains before placing the vessel on [illegible] पञ्चधा॰ = when the rice was moderately swollen. अम्लमण्ड = the scum; excessive boiling water दर्वी = laddle निरन्न = the boiled rice. यथांश = a small proportion दत्तगारधूपं = scented with perfume and species evaporated on the charcoal. पना = a drink of [illegible] scented and specied. श्रमात् = [illegible] of the journey was removed.

28. Vaishampayan.

This piece [illegible] from the Kadambari [illegible] [illegible] written by sweet Banabhatta [illegible] graceful and charming [illegible] metaphors and sublime thoughts [illegible] writes in Panchali style in which the [illegible] words is equally matched with the [illegible]

प्रतीहारी = a female attendant at the royal door सितकञ्चुक = a white cloak hanging upto anklet. अमृतायते = is rendered sweet like nectar. आक्षिप्य = interrupting, stopping. कात्स्न्येन = in all details किंहेतुकं = on what ground, what is the reason. विस्पष्ट = with clear pronunciation and correct

un विद्युत + आहार: । हार्त षा = (1) observing fa
void of pearl-necklace owing to grief.

29. The Beauty of Moon rise.

Note the picturesque description in this as
group Autumnal Beauty. Both these pro
spontaneous flow and delighting influence
ilmik's diction.

सचिवता = ministership, friendship. ज्योत्स्नादि
mps of moonshine, समुद्गत = coming out, rise
g. तमांसि—आवरणानि = sins, darkness. संवर्धन
using to increase or rise. मुक्तकलाप = rending
tuses, राजत = made of silver. जाम्बूनद = gold.
मृगाङ्क = with the black spot like deer's horn, per
ntly seen. ध्वान्तहर = which dispelled darkne
om house. दीप्तिमान = increasing the cruel thar
r flush in the mind of the demons. अपहृतकल्मष
moving the dirt of mind by devotion toward
nan.

30. The Glory of India.

The seven verses are taken from Bhagwat are
... ons ascribed to Vyas Muni. The
... attach great importance and sanctity
... and of Bharat i.e. India.

अङ्कम = in the lap of Bharat land. मुकुन्दसेवा =
... in the service of Krishna. स्वर्गपुरं =
... residence in Bharatland. भयानि = for
... dangers, fears. महोत्सव = of greater event
... बलान्वित = invariable. स्वर्गान्तर =